भूपूरे-दशदिक्पाल पूजनम् ।

तत्रैव-दशायुध पूजपम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

भूपूराद्वहि-खड्ग मुंड वराभयमुद्रा पूजनम् ।
पुनः-गणेश वटुक क्षेत्रपाल योगिनी पूजनम् ।
विधाय-दशावरणपूजां खड्ग मालोक्त विधिना पूजयेत् ।

ततः समाहित चेता अष्टोत्तरशतं सहस्त्रं अयुत्तम् वाजपं कुर्यात् ।

श्री दक्षिण कालिका पूजन यंत्र



Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

यागमन्दिर प्रवेशः

ऐं ह्रीं श्रीं भ भद्रकाल्यै नमः । (द्वारस्यदक्षशाखायां)
३ भं भैरवाय नमः । (द्वारस्य बामशाखायां)
३ लं लम्बोदराय नमः । (द्वारस्यउर्ध्वशाखायां)
॥ इति द्वारदेवताः सपूज्य ॥

तत्वाचमनम्

ऐं ह्रीं श्रीं क्रीं आत्मतत्वं शोधयामि स्वाहा ।
३ क्रीं विद्यातत्वं शोधयामि स्वाहा ।
३ क्रीं शिवतत्वं शोधयामि स्वाहा ।
३ क्रीं सर्वतत्वं शोधयामि स्वाहा ॥

गुरू पादुकामन्त्र

ओं ऐं ह्रीं श्रीं, ऐं क्लीं सौः, हंसः शिवः सोहं; हस्ख्फ्रें हसक्षमलवरयूं हसौः सहक्षमलवरयीं स्यौः हंसः शिवः सोहं स्वरूपनिरूपणहेतवे श्री गुरवे नमः, अमुकानन्दनाथश्रीपादुकांपूजयामि नमः ॥

ओं ऐं ह्रीं श्रीं, ऐं क्लीं सौः, सोहं हंसः शिवः, हस्ख्फ्रें हसक्षमलवरयूं हसौः सहक्षमलवरयीं स्हौः सोहं हंसः शिवः स्वच्छप्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः, अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ॥

ओं ऐं ह्रीं श्रीं; ऐं क्लीं सौः, हंसः शिवः सोहं हंसः,

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

हखफ्रें हसक्षमलवरयूं हसौः सहक्षमलवरयी स्यौः हंसः शिवः सोहं हंसः स्वात्मारामपञ्चर विलीन तेजसे श्री-परमेष्ठिगुरवे नमः अमुकानन्द नाथ श्रीपादुकां पूजयामि नमः ॥

इति मृगी मुद्रया गुरुपादुकामुच्चार्य, सुमुख-सुवृत्त चतुरश्रमुद्गर-योन्याख्याभिः श्री गुरून् वामभुजे प्रणम्य, गणपतिमूलेन स्वदक्ष भुजे योनिमुद्रया महागणपति प्रणमेत् ॥

घण्टा पूजा

हे घण्टे सुस्वरे पीठे घण्टा ध्वनिविभूषिते,
वादयन्ति परानन्दे घण्टादेवंप्रपूजयेत् ।
आगमार्थं च देवानां गमनार्थं तु रक्षसाम्,
कुर्यात् घण्टारवं तत्र देवताह्वानलाञ्छनम् ॥

॥ इति घण्टानादं कृत्वा ॥

संकल्पः

मेघाङ्गीं शशि-शेखरां त्रिनयनां रक्ताम्बर बिभ्रतीम्,
पाणिभ्यामभयं वरं च विलसद् रक्तारविन्द-स्थिताम् ।
नृत्यन्तं पुरतो निपीय मधुरं माध्वीक-मद्यं महा,
कालंवीक्ष्य विकासितानन-वरामाद्यां भजे कालिकाम् ॥

मूलेन प्राणानायम्य । देशकालौ संकीर्त्य मम श्री-दक्षिणकालिका प्रीत्यर्थं यथा संभवद्रव्यैः यथाशक्ति

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

दक्षिणकालिकाक्रमं निर्दर्तयिष्ये,- तेन परमेश्वरीं प्रीणयामि ॥

आत्मानं अलंकृत्य ताम्बूलेन सुरभिवतदनः सन् प्रमुदित्त-चित्तः शिवोऽहं इति भावयेत् ॥

आसनपूजा

आसनमास्तीर्य दक्षिणहस्ते जलमादाय सैः इतिद्वादश-वारमभिमन्त्र्य तञ्जलेन मूलमन्त्रेण आसनं प्रोक्षयेत् ॥

अस्य श्री आसनमहामन्त्रस्य-पृथिव्याः मेरूपृष्ठ ऋषिः, सुतल छन्दः, कूर्मो देवता, आसने विनियोगः ॥

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुनाधृता ।

त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।

योगासनाय नमः, वीरासनाय नमः, शरासनाय नमः ॥

ओं ऐं ह्रीं श्रीं ओं ह्रीं आधारशक्तिकमलासनाय नमः ॥

इति पुष्पाक्षतैः आसनमभ्यर्च्य आसने उपविशेत् ।

३रक्तद्वादशशक्तियुक्तायद्वीपनाथाय नमः ।

॥ इति भूमौ पुष्पाञ्जलि विकिरेत् ॥

देहरक्षा

३ श्रीदक्षिणकालिके आत्मानं रक्ष रक्ष इति देहे त्रिः व्यापकं कृत्वा ॥

गुं गुरुभ्यो नमः । (दक्षबाहौ)

गं गणपतये नमः । (वामबाहौ)

दुं दुर्गायै नमः । (दक्षोरौ)

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

वं बटुकाय नमः । (वामोरौ)
यं योगनीभ्यो नमः । (पादयोः)
क्षं क्षेत्रपालाय नमः । (नाभौ)
पं परमात्मने नमः । (हृदये)

२ ओं नमो भगवति तिरस्कारिणि महामाये महानिद्रे सकलपशुजनमनश्चक्षुः श्रोत्रतिरस्करणं कुरु कुरु स्वाहा । पारितोवह्निप्राकारं विभाव्यभूभुर्वस्सुवरो इतिदिग्बन्धः ।

परमामृत्तवर्षेण प्लावयन्तं चराचरम् ।
संचिन्त्य परमद्वैत्तभावनाऽमृतसेवया ॥
मोदमानो विस्मृतान्यविकल्पविभवभ्रम ।
चिदम्बुधिमहाभङ्गच्छिन्नस कोच संङ्कट ॥

२ क्रीं ऐं ह्रः अस्त्राय फट्-इति-अस्त्र-मन्त्रेण मुहुराबृतेन अङगुष्ठादिकनिष्ठिकान्तं करतलयोः कूर्परयोः देहे च व्यापकं कुर्यात् ॥

२ क्रीं श्री गुरो करुडा मूर्ते भक्तानुग्रहकारक ।
अनुज्ञां देहि भगवान कालिका यजनायमे ॥
२ क्रीं अतिक्रूर महाकाय कल्पान्त दहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

लघुप्राणप्रतिष्ठो

२ आं ह्रीं क्रों यं लं वँ शँ सँ हँ ओं हंसः सोहं, सोहं हन्सः शिवः श्रीकालिकाया प्राणाइह प्राणाः ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

३ आं ह्रीं क्रों श्रीकालिकास्य जीव इह स्थितः। सर्वेन्द्रियाणि वाङ्मनश्चक्षु: श्रोत्र जिव्हाघाणा इहैवागत्य अस्मिन् यन्त्रे सुखं चिरं तिष्ठन्तुस्वाहा ।।

३ ओं असुनीतेपुनरस्मासु चक्षु: पुनः प्राणमिहनो धेहिभोगम् ।

ज्योक्पश्येम सूर्यमुच्चरन्तमन्नुमते मृडया नस्वस्ति ।

दीप पूजा

स्वदक्ष भागे गन्धपुष्पाक्षतादीन्निधायदीपा नभितः प्रज्वाल्य ।।

घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।
सितवर्तियुतो दक्षे रक्तवर्तिस्तुवामतः ।।
दक्षवामभागौ देव्या एव ।

ऐं ह्रीं श्रीं दीपदेवि महादेवि शुभं भवतु मे सदा ।
यावत्पूजासमाप्तिः स्यात्तावत्प्रज्बलसुस्थिरा ।।

।। इति पुष्पांञ्जलिं दद्यात् ।।

मूलेन यन्त्रमध्येपुष्पाञ्जलिं विकीर्य, मूलत्रि खंडेन स्वाग्रवामदक्षकोणेषु पुष्पाञ्जलीन्दद्यात् ।।

अन्तर्याग

यथा मूलाधारादाब्रह्मबिल बिलसन्तीं विसतन्तु तनीयसीं विद्युत्पुञ्जपिञ्जरां विवस्वदयुत भास्वत्प्रकाशां परश्शतसुधामयमूखशीतल तेजो दण्डरूपां परिचितिं भावयेत् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ततदग्रे जीवात्मानं पुष्पपूरिताञ्जलिनिविष्टं भावयन्

स्वदेहे भगवत्या श्री दक्षिणकालिकायाः यन्त्रं यथा ब्रह्मरन्ध्रे बिंदु मस्तके भ्रूमध्ये कंठे अनाहते मणिपूरके च पंचत्रिकोणं भावयित्वा स्वाधिष्ठाने ऽष्टदलात्मक पद्मं तथा च मूलाधारे भूपुरं चक्रं विभाव्य-

ब्रह्मरन्ध्रात् श्री दक्षिणकालिकाम्बां हृदयं नीत्वा तत्तत्पूजा मन्त्रैः तत्तदावरणपूजां; श्री दक्षिणकालिका देव्या बामहस्ते पूजा समर्पणं च विभाव्य, श्रीदक्षिण कालिकाँ सचक्रा वयवानि आवरणानि विलीनानि विभाव्य, मध्यदयश्चाग्रे (देवीपादमूले) स्थित जीवात्मना सहिताँ ब्रह्मरन्ध्रात् श्री दक्षिण कालिकाम्बां हृदयं नीत्वा स्वाञ्जलिगतकुसुमैः तत्र तां सम्पूज्य, ततः अकुलेन्दुगलितामृतधारारूपिणीः चन्दन कुसुमधूपदीपनैवेद्य-शालिकरकमलाः पीतासित श्यामरक्तशुक्लवर्णाः धरणि-वियदनिलानलजल लक्षणपञ्चभूतमयीः सर्वावयव-सुन्दरीः पञ्चदेवताः देव्यग्रे संस्मृत्य, ताभिः चन्दना-द्युपचारान् श्री दक्षिणकालिका देव्यै समर्पितान् स्मारं स्मारं पञ्चोपचारमुद्राश्च प्रदर्शिता भावयेत् ॥

ततो श्री दक्षिणकालिका देव्या नासायां गन्धदेवता, श्रोत्रे पुष्पदेवता, नाभौ धूपदेवता, नयने दीपदेवता, जिह्वायाँ नैवेद्यदेवता इति क्रमेण विलीनाः विभाव्य, मूलविद्यां उच्चरन्,जीवाष्मानं श्रीदक्षिणकालिका देवी-पादारविन्दमूले लीनं विभाव्य, हृदयगतदेवीं रूपं मध्य-दयश्रसहित तत्रं वकेवलं ज्योतिर्मयतामापन्नं ध्यायन्

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

भावयित्वा, क्षणं न किंचिदपि चिन्तयेत् ॥

अथ् देव्या प्रेरितमानसः सन् पुनः प्रकृतिमाल लस्थ तेजोरूपेण परिणतां परमशिव ज्योतिरभिन्न प्रकाशात्मिकां वियदादिविश्वकापणाँ स्वात्मभिन्नाँ परिचितिं सुषुम्ना पथेन उद्गमय्य विनिर्भिन्नाविधिविल-विलसदमलदशशतदल कमलात् वहन्नासापुटेन निर्गतां त्रिखण्डामुद्रा मण्डितशिखण्डे कुसुमगर्भितेऽञ्जलौ समानीय ३ क्रीं हुँ ह्रीं श्री दक्षिणकालिका अमृतचैतन्य मूर्ति कल्पयामि नमः ॥

ध्यानं

करालवदनां घोराँ मुक्त केशीं चतुर्भुजाम्,
कालिकाँ दक्षिणाँ दिव्याँ मुण्डमाला विभूषिताम् ॥
सद्यश्छिन्न शिरः खड्गवामाधोर्ध्व कराँबुजाम्,
अभयं वरदं चैव दक्षिणाधोर्ध्व पाणिकाम् ॥
महामेघ प्रभाँ श्यामाँ तथा चैव दिगम्बराम् ।
कण्ठावसक्त मुण्डाली गलद् रुधिर चर्चिताम् ॥
कर्णावतंसमानीत शव युग्म भयानकाम् ।
घोर दंष्ट्राँ करालास्याँ पीनोन्नत पयोधराम् ॥
शवानाँ करसंधातैः कृतकाँची हसन्मुखीम् ।
सृक्कद्वयगल द्रक्त धारा विस्फुरिताननाम् ॥
घोररावाँ महा रौद्रीं श्मशानालय वासिनीम् ।
बालार्क मण्डाकाराँ लोचन त्रितयान्विताम् ॥
दंतुराँ दक्षिणाकालि मुक्ता लम्बिकचोच्चयाम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शव रूप महादेव हृदयोपरि संस्थिताम् ।
शिवाभिर्घोरावाभि श्चतुर्दिक्षु समन्विताम् ।
महाकालेन च समं विपरीतरता तुराम् ॥
सुख प्रसन्न वदनां स्मेराननु सरोरूहाम् ।
एवं संचिंतयेत्कालीं सर्व काम समृद्धिदाम् ॥

श्री दक्षिण कालिका पूजन यंत्र



Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

श्री दक्षिण कालिका पूजन यंत्र

श्री दक्षिण कालिका पूजन यंत्र



Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh



इस मन्त्र से यन्त्र का उद्धार करना चाहिये ।

यन्त्रोद्धार

त्रिकोण पंचकं अष्टदल पंकजं भूपुर
मिति भगवत्याः श्री दक्षिण कालकायाः

यन्त्रराजम्

इस मन्त्र से जप करने की माला का पूजन करना चाहिये ।

माला पूजनम्

ॐ माँ माये महामाले सर्व सिद्धि स्वरूपिणि ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

अभीष्टं देहि मे माले त्वा महं शरणं गतः ॥

इति प्रार्थ्य जपँ कुर्यात् ।

संकल्पः

साधक को संकल्प इस प्रकार करना चाहिये ।

मूलेन प्राणानायम्य देश काली संकीर्त्य ममोपात समस्त दुरितक्षय पूर्वकं श्री कालिकाम्बा प्रसाद सिद्धयर्थ यथाशक्ति क्रमँ निर्वर्तयिष्ये ।

इति संकल्प ताम्बूलेन पञ्चतिक्तेनवा सुरभि वदनः ऊर्णाद्यासनं काली तृतीय बीजेन द्वादशवारम-भिमन्त्रितेन जलेनमूलँन्त्रोक्षितंविधाय,

अथ् श्री दक्षिण कालिका पूजन पद्धतिम्

॥ प्रारम्भम् ॥

श्री दक्षिण कालींध्यात्वा मानसोपधारैः संपूये-जत् । ततः पीठादौ रचिते सर्वतोभद्र मण्डले पद्धति मार्गेण मंडूकादि परतत्वाँत पीठ देवताः संस्थाप्य 'ॐ मं-मंडूकादि तत्वाँत देवताभ्यो नमः' इति पीठ देवताः संपूज्य नवपीठ शक्तिः पूज्येत् । तथा च पूर्वादि क्रमेण ॐ जयायै नमः ॥१॥ ॐ विजयायै नमः ॥२॥ ॐ अजितायै नमः ॥३॥ ॐ अपराजितायै नमः ॐ नित्यायै नमः ॥५॥ ॐ विलासिन्यैनमः॥६॥ऒं

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

दोग्ध्र्यै नमः ॥७॥ ॐ अघोरायै नमः ॥८॥

मध्य में इस प्रकार पूजा करें ।

"मध्यें"

ओं मंगलायै नमः ॥९॥ इति पीठ शक्तिः पूजयेत् ।

तत् स्वर्णादि निर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्वा स्वच्छ वस्त्रेणा वेष्टय 'ॐ ह्रीं कालिका योग पीठात्मने नमः' इति मंत्रेण पुष्पाद्यासनंदत्वा पीठ मध्ये संस्थाप्य पद्धति मार्गेण प्रतिष्ठां च कृत्वा मूलेन प्रकल्प्य पाद्यादि पुष्पांते रुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरण पूजांकुर्यात् ।

पुष्पांजलि मादाय 'ॐ संविन्मये परेशानि परामृते चरुप्रिये । अनुज्ञां दक्षिणे देहिपरिवारार्चनायमे ।

इति पठित्वा पुष्पांजलिं दत्वा पूजितास्तर्पिताः सन्तु इति वदेत् ।

फिर इसके उपरान्त ध्यान करें ।

तत्रध्यानम्

'तुषार स्फटिक श्याम नील कृष्णा रूणास्तथा ।
वरदाभय धारिण्य रंगभूता षडस्त्रियः ।

हृदयादिन्याषडंगपूजन-

क्रां हृदयाय नमः । देवतां श्री पादुकां पूजयामि तर्पयामि नमः ॥१॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

इति सर्वत्र ओं क्रीं शिरशे स्वाहा शिरोदेवतां श्रीपादुकां-
पूजयामि तर्पयामि नमः ॥२॥

ओं क्रू शिखायै वषट् शिखा देवतां श्रीपादुकां पूजयामि
तर्पयामि नमः ॥३॥

ओं क्रैं कवचाय हुं कवच देवतां श्रीपादुकांपूजयामि
तर्पयामि नमः ॥४॥

ओं क्रौं नेत्रयाय वौषट् नेत्र देवतां श्रीपादुकांपूजयामि-
तर्पयामि नमः ॥५॥

ओं क्रः अस्त्राय फट् अस्त्र देवतां श्रीपादुकांपूजयामि
तर्पयामि नमः ॥६॥

॥ इति षडग पूजा ॥

ततः पुष्पांजलिमादायमूलमुच्चार्थ 'अ' अभीष्ट सिद्धिं मे देहि शरणागत वत्सले ।

भक्त्या समर्पये तुभ्यं प्रथमा वरणार्चनम् इति पठित्वा पुष्पांजलिं च दत्वा विशेषार्घा द्विं दुं निक्षिप्य हृदयादिषडंगदेव्यः पूजितास्तर्पिताः सन्तु इति वदेत् ।

॥ इति प्रथमावरणम् ॥

॥ अथ नित्यापूजनम् ॥

ततः पूज्य पूजक्यों रंतराल प्राचीं तदनुसारेण अन्यादिशः प्रकल्प्यप्राची क्रमेण षट् कोणेषु काल्यादिः नित्या पूजयेत् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

तत्रध्यानम्

ॐ सर्वाः श्यामा रसिकरा मुण्डमाला विभूषिताः, ।
तर्जनीं वाम हस्तेन धारयंत्यश्च सुस्मिताः ॥

॥ इति ध्यात्वा पूजयेत् ॥

ॐ काल्यै नमः । काली श्री पादुकां पूजयामि तर्पयामि नमः ॥१॥

ॐ कपालिन्यै नमः कपालिनी श्री पादुकां पूजयामि तर्पयामि नमः ॥२॥

ॐ कुल्लायै नमः । कुल्ला श्रीपादुकां पूजयामि तर्पयामि नमः ॥३॥

ॐ कुरुकुल्लायै नमः । कुरुकुल्ला श्री पादुकां पूजयामि तर्पयामि नमः ॥४॥

ॐ विरोधिन्यै नमः । विरोधिनी श्री पादुकां पूजयामि तर्पयामि नमः ॥५॥

ॐ विप्रचित्तायै नमः । विप्रचित्ता श्री पादुकां पूजयामि तर्पयामि नमः ॥५॥

ॐ विप्रचित्तायै नमः । विप्रचित्ता श्री पादुकां पूजयामि तर्पयामि नमः ॥६॥

अभीष्ट सिद्धिं मेदेहि शरणागत वत्सले ।

भक्त्या समर्पयेस्तुभ्यं द्वितीयावरणार्चनम् । इति पठित्वा विशेषार्घ्यं द्विं द्रं निक्षिप्य पूजिता स्तर्पिताः सन्तु इति वदेत् ॥ इति द्वितीयावरणम् ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

तत्रस्त्रिकोणत्रितयेसु ग्राद्याः नवनित्याः पूजयेत्
:"तत्र प्रथम त्रिकोणसमुखे"-ॐ उग्रायै नमः । उग्रश्री-
पादुकां पूजयामि तर्पयामि नमः ।।७।।

'वामे'

८
ॐ उग्रप्रभाये नमः । उग्रप्रभा श्री पादुकांपूजयामि
तर्पयामि नमः ।।२।।

'दक्षे'

९
ॐ दीप्तायै नमः । दीप्ता श्री पादुकांपूजयामि तर्प-
यामि नमः ।।३।।

'द्वितीयत्रिकोणे'

१०
ॐ नीलायै नमः । नीला श्री पाकांपूजयामि तर्प-
यामि नमः ।।४।।

'वामे'

११
ॐ धनायै नमः । घना श्री पादुकांपूजयामि तर्पयामि
नमः ।।५५।।

'दक्षे'

१२
ओं बलाकिकायै नमः । बलाकिका श्री पादुकांपूज-
यामि तर्पयामि नमः ।।६।।

'तृतीयत्रिकोणे'

१३
ओं मात्रायै नमः । मात्रा श्रीपादुकांपूजयामि तर्प-
यामि नमः ।।७।।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

"वामे"

१४

ॐ मुद्रायै नमः । मुद्रा श्री पादुकां पूजयामि तर्पयामि नमः ॥८॥

१५

"दक्षे"

ॐ मित्रायै नमः । मित्ता श्री पादुकां पूजयामि तर्पयामि नमः ॥९॥

॥ इति पूजयेत् ॥

ततः पुष्पांजलिमादाय मूल मुच्चार्य-

अभीष्ट सिद्धिं मेदेहि शरणागतवत्सले ॥

भक्त्या समर्पये तुभ्यं तृतीया वरणार्चन ॥

ततो अष्टदले प्राची क्रमेणाष्टशक्तीः पूजयेत् ।

दंडं कमण्डुलं पश्चादक्ष सूत्रं महाभयम् ॥

बिभ्रती कनकच्छाया ब्राह्मी कृष्णा जिनोज्वल ॥१॥

शूलं परशवधं क्षुद्रं दुन्दुभिं नरकपेटिकाम् ॥

महंती हिम संकाशाध्येया माहेश्वरी शुभा ॥२॥

अंकुशं दन्ड खट्वाङ्गौ पाशं च दधती करैः ॥

बंधूक पुष्प संकाशा कुमारी काम दायिनी ॥३॥

चक्रं घंटां कपालं च शंख च दधती करैः ॥

तमाल श्यामला ध्येया वैष्णवी विभ्रमोज्वला ॥४॥

मुसलं करवालँ च खेटकं दधती हलम् ॥

बारा ही महिषारूढ़ा ध्येया कालघन च्छवि ॥५॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

नीलोत्पल-दल श्यामाम् भुजङ्गाऽऽभरणोज्व लाम् ।
बालेन्दु-मौलिनां साध्वीं नयन-त्रितयाऽचिताम् ॥१॥

शङ्ख-चक्र धरां देवीं वरदाऽभय-शालिनीम् ।
पीनो तुङ्ग-तनीं श्यामां बद्ध-पद्मासनां शिवाम् ॥२॥
अजितां चिन्तयेद् भक्त्या वैष्णवीम् अपराजिताम् ।
शुद्ध-स्फटिक-सङ्काशां चन्द्र कोटि-सुशीतलाम् ॥३॥

सुमुखीं सुन्दर-भुजां श्वेत वस्त्रैरलङ्कृताम् ।
मोहिनीं सर्व-जगतां जयन्तीं भक्तवत्सलाम् ॥४॥

शूलं कृपाणं नृशिर: कपालं दधती करैः ॥
मुण्डस्त्रग् मंडिता ध्येया चामुण्डा रक्त विग्रहा ॥७॥

नरसिंह प्रतीकाशा अक्षमाला विभूषणा
असुराणाभसृ क्मांस वसारक्त नखी सुदा
नारसिंही सदाध्येया भक्ताभीष्ट प्रदायिनी
भक्तार्ति भंजन करी सर्व संपत्प्रदायिनी ॥८॥

इस प्रकार से साधक को ध्यान और पूजन करना चाहिये ।

॥ इति ध्यात्वा पूजयेत् ॥

'तद्यथा'

१६
ॐ ब्राह्मयै नमः । ब्राह्मी श्रीपादुकां पूजयामि तर्पयामि नमः ॥१॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

१७
ॐ नारायण्यै नमः नारायणी श्री पादुकांपूजयामि तर्पयामि नमः ।।२

१८
ॐ माहेश्वर्यै नमः । माहेश्वरी श्री पादुकां पूजयामि तर्पयामि नमः ।।३।।

१९
ॐ चामुण्डायै नमः । चामुण्डा श्री पादुकां पूजयामि तर्पयामि नमः ।।४

२०
ॐ कौमार्यै नमः । कौमारी श्री पादुकां पूजयामि तर्पयामि नमः ।।५

२१
ॐ अपराजितायै नमः । अपराजिता श्रीपादुकांपूजयामि तर्पयामि नमः ।।६

२२
ॐ वाराह्यै समः । वाराही श्री पादुकांपूजयामि तर्पयामि नमः ।।७

२३
ॐ नारसिंह्यै नमः । नारसिंह श्री पादुकांपूजयामि तर्पयामि नमः ।।८

❀ इति पूजयेत् ❀

पुष्पांजलि मादाय मूलमुच्चार्य-
अभीष्ट सिद्धि मेदेहि शरणागत वत्सले ।।
भक्त्या समर्पये त्तुभ्यं चतुर्थावरणार्चनं ।।
इति पठित्वा पूजिताः तर्पिता सन्तु इति वदेत् ।।
ततो भूपूराभ्यंतरेऽष्टरेष्टसुदिक्षु प्राची क्रमेण अष्ट भैरवान् पूजयेत् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

'ध्यानम्'

भीषणास्यं त्रिनयनं अर्धचन्द्र विभूषितम् ।
स्फटिकाभ कंकणादि भूषाशत समायुतम् ॥१
अष्टवर्ष वयस्कं च कुंतलो ल्लसितं भजे ।
धारंयंत दण्डशूले भैरव्याधि विनाशनम् ॥२

❀ इतिध्यात्वा पूजयेत् ❀

'शाक्तप्रमोदे'

२४
ॐ ऐं ह्लीं अं असितांग भैरवाय नमः । असितांग
२५ भैरव श्रीपादुकांपूजयामि तर्पयामि नमः ॥१
ॐ ऐं ह्लीं इं रुरु भैरवाय नमः । रुरु भैरव श्री-
२६ पदुका पूजयामि तर्पयामि नमः ॥२
ॐ ऐं ह्लीं उं चण्ड भैरवाय नमः । चण्डभैरव श्री-
२७ पादुकां पूजयामि तर्पयामि नमः ॥३
ॐ ऐं ह्लीं ऋं क्रोध भैरवाय नमः । क्रोध भैरव
२८ श्रीपादुकां पूजयामि तर्पयामि नमः ॥४
ॐ ऐं लृं उन्मत्त भैरवाय नमः । उन्मत्त भैरव श्री
२९ पादुकां पूजयामि तर्पयामि नमः ॥५
ॐ ऐं ह्लीं एं कपालि भैरवाय नमः । कपालि भैरव
३० पादुकांपूजयामि तर्पयामि नमः ॥६
ॐ ऐं ह्लीं ओं भीषण भैरवाय नमः । भीषण भैरव
श्री पादुकां पूजयामि नमः ॥७

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

३१
ॐ ऐं ह्लीं अं संहार भैरवाय नमः । संहार भैरवी श्री
पादुकाँ पूजयामि तर्पयामि नमः ।।८।।

ततस्तत्र समीपेऽष्ट भैरवीः पूजयेत् ।

'तत्रध्यानम्'

भावयेञ्च महादेवीं चन्द्रकोटि युत प्रभाम् ।
हिमकुन्देन्दु धवलाँ पंच वक्राँ त्रिलोचनाम् ।।१।।
अष्टादश भुजैर्युक्ताँ सर्वानन्द करोद्यताम् ।
प्रहसंतीं विशालाक्षीं देवदेवस्य संमुखीम् ।।२।।

❀ इति ध्यात्वा पूजयेत् ❀

३२
ॐ श्रीं श्री भैरव्यै नमः । श्रीभैरवी श्री पादुकाँ पूज-
यामि तर्पयामि नमः ।।१।।

३३
ॐ श्रीं मं महा भैरव्यै नमः । श्री महाभैरवी श्री-
३४ पादुकाँ पूजयामि तर्पयामि नमः ।।२।।
ॐ श्रीं सिं सिंह भैरव्यै नमः । श्री सिंह भैरवी श्री
३५ पादुकाँ पूजयामि तर्पयामि नमः ।।३।।
ॐ श्रीं धूं धूम्र भैरव्यै नमः । श्री धूम्रभैरवी श्री-
३६ पादुकां पूजयामि तर्पयामि नमः ।।४।।
ॐ श्रीं भीं भीम भैरव्यै नमः । श्री भीम भैरवी श्री
३७ पादुकाँ पूजयामि तर्पयामि नमः ।।५।।
ॐ श्रीं उं उन्मत भैरव्यै नमः । श्री उन्मत भैरवी श्री

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

३८ पादुकाँ पूजयामि तर्पयामि नमः ।।६

ॐ श्रीं वं बशीकरणभैरव्यै नमः । श्रीवशीकरण भैरवी

३९ श्रीपादुकाँपूजयामि तर्पयामि नमः ।।७

ॐश्रीं मों मोहन भैरव्यै नमः । श्री मोहन भैरवी

श्री पादुकाँ पूजयामि तर्पयामि नमः ।।८

ततो भूपुराद्वहिः इन्द्रादि दशदिक्पालान् वज्राद्या युधानि च पद्धति मार्गेण पूजयेत् ।

इत्यावरण पूजाँ कृत्वा धूपादि नमस्काराँ तं सम्पूज्य जपं कुर्यात् ।

❀ इति श्री दक्षिण कालिका पूजन पद्धतिम् सम्पूर्णम् ❀

❀——❀

दक्षिण कालिका पद्धति के अनुसार साधको को फल प्राप्ति ।

श्लोक-साधकानाँ वरं दत्वा तिष्ठते च यथा सुखम् ।
महा विशाले बैकुंठे तत्रेच्छा तत्रतिष्ठताम् ।।

हिन्दी-साधक वर प्राप्त कर वहाँ सुख से बैठे और उनसे कह गये महाविशाल बैकुंठ में जहाँ इच्छा हो बिचरे ।।१४।।

श्लोक-महाकल्पं महापंथं भृणुस्कन्द महातपाः ।
कोटिमध्येषु सिद्धास्ते गच्छंति च महापथम् ।।

हिन्दी-हे स्कंद यह महाकल्प महापंथ है । करोड़ो में कोई एक सिद्ध यहाँ पहुँचते हैं ।।१५

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

श्लोक-चतुर्युगे साधकानां तस्य संख्या विधीयते ।
सप्तलक्षं कृतयुगे सत्यं सत्यं वदाम्यहम् ।।
हिन्दी-चारों युगों में साधकों की संख्या कही गई है,
मैं सत्य कहता हूँ सतयुग में ७०००० सात
लाख ।।१६

श्लोक-त्रेतायां पंचलक्षं च गच्छति च महापथम् ।
द्वापरं च त्रयोलक्षं कलौ लक्ष्यैक साधकाः ।।१७
हिन्दी-त्रेता में५००००० पाँच लाख, द्वापर में ३०००००
तीन लाख, और कलियुग में १००००० एकलाख
साधक पहुँचते हैं ।।१७

श्लोक-कैलाश भुवने चैव शिवशक्तिश्च तिष्ठति ।
समुद्र लक्षणाः सर्वे यन्त्र गात्रादि संक्षलः ।।१८
हिन्दी-कैलाश भुवन में शिवशक्ति स्थित रहती हैं ।
सब सामुद्रिक लक्षणों से युक्त महा प्रसन्न हैं
एवं सम्पत्ति मान हैं ।।१८
केदार कल्प ४३ पटल

—❀—

पंचदश तिथि नित्याः

१-काली २- कपालिनी ३- कुल्ला ४-कुरुकुल्ला ५-निरोधिनी ६-विप्रचित्ता ७- उग्रा ८- उग्रप्रेभा ९- दीप्ता १०- नीला ११- घना १२- बलाका १३- मात्रा १४- मुद्रा १५- मिता ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

पंचदशतिथि नित्याःध्यानम्

उद्यद्भानु सम प्रभां रसमुखां पाशाक्ष सूत्रं धनुः ।
खेटं शूलमभीष्टदं च दधतीं वामैश्चषड्भिः करैः ।।
दक्षैरङ्कुशपुस्केषु कुसुमं खड्गं कपाला भयं, ।
माणिक्या भरणोज्ज्वलां त्रिनयनां नित्यां भवानींभजे ।।

अनुलोम-विलोम क्रमम्

श्लोक-

काली चोग्रा तथा मात्रा नित्याः प्रोक्तानुलोमतः ।
बलाका विप्रचित्ता च विलोमे प्रथिताः सदा ।।

संख्य, घटिका, तिथि, अनुलोम क्रमम्

१. अ–काली, ७. ए–उग्रा, १३. च–मात्रा

संख्या, घटिका, तिथि, विलोम क्रमम्

१२–त-बलाका, ६–य-विप्रचित्ता

पंच मकार नाम

१. माँस, २. मदिरा, ३. मैथुन ४. मत्स्य ५. मुद्रा ।

पंचदश तिथि नित्याः

काली की नित्यायें

(मंत्र एवं ध्यान सहित)

१-कालीनित्या

मंत्र-ॐ ह्रीं कालि कालि कौमारि मह्यं देहि स्वाहा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ध्यानम्

श्याम वर्णा महा-भीमा घोर-रावा करालिनी ।
मुण्ड माला-विभूषाढ्या दक्षे खड्गे प्रविभृति ।
तर्जनीं धारयन वामे नृत्यन्ती प्रेत भूमिषु ॥

२-कपालिनी

मन्त्र-ॐ ह्रीं क्रीं कपलानी महाकपाल-प्रिय मानसे कपाल सिद्धि मे देहि हूं फट् स्वाहा ।

ध्यानम्

ध्यायेदञ्जन-पुञ्जा भीमापीन-स्तन-युग्मकाम्,
चन्द्र-वक्त्र च बिम्बोष्ठीं मुक्त-केशीं दिगम्बरां ।
चतुर्मुण्डोपरि-गतां शंख कङ्कण भूषिताम्,
खड्ग-त्रिशूल-वरदाभ्यान् हस्त-चतुष्टये ॥

३- कुल्ला

मंत्र-ॐ क्रीं कुल्लायै नमः नमः ।

ध्यानम्

चतुर्भुजा त्रिनयनां मुकुटा मोप-मण्डिताम्,
शवासन-गतां कुल्लां दश-मुण्डोपरि स्थिताम् ।
बराभयौ करे वामे पुस्तकं स्त्रग दक्षिणे करे ॥

४-४ कुरुकुल्ला

मंत्र-क्रीं ॐ कुरुकुल्ले क्रीं ह्रीं मम सर्व-जन-वश मानय क्रीं कुरुकुल्ले ह्रीं स्वाहा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ध्यानम्

ततोध्याये-महाविद्यां कुरुकुल्लां कुलेश्वरीम् ।
शवोपरि-समासीनां मुण्डमाला-विभूषिताम् ।।
कपाल कर्त्तृका हस्तां-खड्ग-खेटक धारिणीम् ।
अञ्जनाद्रि-निभां दिव्यां मुक्त-केशी चतुर्भुजाम् ।।

५. विरोधिनी

मंत्र-ॐ क्रीं ह्रीं क्लीं, हूँ विरोधि शत्रूधूच्चाय्य विरोधय त्रत्रुक्षयङ्करी हूँ फट् ।

ध्यानम्

चतुर्भुजाँ त्रिनयनां शव-पदमोपरि स्थिताम्,
त्रिशिखं-नाग-पाशं च घण्टां, च डमरुं तथा ।
सम्बिभ्रतीं मपादेवीं क्रमाद्-भुज-चतुष्टये ।।

६. विप्रचित्ता

मंत्र-ॐ श्रीं क्लीं चामुण्डे विप्रचित्ते दुष्ट-घातिनी शत्रून्घातव एतद्दिनावधि विप्रे सिद्धि मे देहि हुँ फट् स्वाहा ।

ध्यानम्

चतुर्भुजां त्रिनयनां पीनोन्नत-पयोधराम्,
दिगम्बरां मुक्त-केशीं ललज्जिहवा भयानकाम् ।
भीम दंष्ट्रां करालास्यां सृक्किणीं-रक्त-वाहिनीम्,
खड्गं-मुण्डं-कपालं-च शूल-हस्तां यहोदरीम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

७-उग्रा

मन्त्र-ॐ स्त्रीं हूँ ह्रीं हूँ फट्।

ध्यानम्

ततोध्यायेत् परामुग्रां प्रत्यालीढ-पद-स्थिताम्।
चतुर्भुजां त्रिनयनां मुण्डमाला-विभूषिताम्॥
श्याम-वर्णां मुक्त-केशीं खड्गेन्दीवर धारिणीम्।
कपाल-कर्तृका हस्तां वर-दान-परायणाम्॥

८—उग्रप्रभा

मन्त्र-ॐ हूँ हूँ उग्र-प्रभे देवी काली-महादेवि स्वरूपं दर्शय हूँ फट् स्वाहा।

ध्यानम्

चतुर्भुजां त्रिनयनां शव-पद्मोपरि स्थिताम्।
सुप्रसन्न-मुखाम्भोद्यां शवानां-माँस-भोजिनीम्॥
शवानां-कर-संघातैःकृत-काञ्चीं हसन्मुखीम्।
खड्ग-मुण्डधरां बामे दक्षे खर्पर कर्तृके॥

९—दीप्ता

मंत्र—क्रीं हूँ दीप्तायै सर्व-फलदायकायै हूँ फट् स्वाहा।

ध्यानम्

चतुर्भुजा त्रिनयनां मुण्डमाला विभूषिताम्।
शव पद्मे समासीनां पीनोन्नत-पयोधराम्॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शवास्थि कृतन्केयूर शंख कङ्कण भूषिताम् ।
खड्ग मुण्ड धरां वामे सव्येऽभय वर प्रदाम् ॥

१०—नीला

मंत्र—हूँ हूँ क्रीं क्रीं ह्रीं हसक्षमलवरयीं नील पत्ताके हें फट् ।

ध्यानम्

भयंकराकृति धरां मुण्ड माला विभूषिताम् ।
रक्त चंचल नेत्राब्जां ललज्जिहवां च भीषणाम् ।
शवोपरि समासीनां नर मुण्ड विभूषिताम् ।
ध्यायेन् नीलां ज्ञान दात्रीं सर्व सिद्धि प्रदायिनीम् ॥

११—घना

मंत्र—ओ क्लीं ओं घनालये घनालयें हूँ फट् ।

ध्यानम्

चतुर्भुजां त्रिनयनां कृष्ण वर्णा च भीषणाम् ।
सद्यः कृतित वाहनां बिभ्रतीं क्षुद्र घंटिकाम् ॥
हस्तेषु खेटकं खड्गं पाश मदगरं तथा ।
धारयन्ती घनां ध्यायेत् रक्ताप्लाविताधराम् ॥

१२—बलाका

मंत्र—ओं क्रीं हूँ ह्रीं बलाका कालि अत्यद्भुत पराक्रमे ॥
अभीष्ट सिद्धि मे देहि हूँ फट् स्वाहा ।

ध्यानम्

नित्यां बलाकां ध्यायेत् त्रिनेत्रां श्मशान वासिनीं ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

भीमाकृतिः श्यामवर्णा दधानां हस्त किंकिणीम् ।।
विकीर्ण-केशैः राजन्तीं धारयन्तीं च वाहुषु ।
खड्गं मुण्डं दक्षे वामे चषकं मुद्रां च तर्जनीम् ।।

१३—मात्रा

मंत्रा—ओं क्रीं ह्रीं हूँ महा मात्रे सिद्धिं मे देहि सत्वरं हुँ फट् स्वाहा ।

ध्यानम्

शव वक्षसि भ्राजन्तीं भीषणाकार-धारिणीम् ।
त्रिनेत्रैः शोभिताम् दिव्यां चतुर्भिबाहुभिस्तथा ।।
कपाल कर्तृकां चैव तीक्ष्णं खड्गं शिरस्तथा ।
धारयन्तीं भजे मात्रां भक्ताभीष्ट-प्रदायनीम् ।।

१४—मुद्रा

मंत्र-ॐ क्रीं ह्रीं हुँ क्रीं क्रीं मुदाम्बा मुद्रा-सिद्धि मे देहि भोजगन्मुद्रा स्वरूपिणी हुँ फट् स्वाहा ।

ध्यानम्

ध्यायामि मुद्रां नित्यां वै मुण्ड-माला-विभूषिताम् ।
रूधिरेणाधरोष्ठं च प्लावयन्तीं भयंकरीम् ।।
चतुर्भुजैः कपालं च छुरिकां लड्ग खेटके ।
दधानां जयदां देवीं जनानामभयप्रदाम् ।।

१५—मित्ता

मंत्र-ॐ क्रीं हुँ ह्रीं ऐं मिते पारमिते पराक्रमाय ॐ क्रीं हुँ ह्रीं ऐं सोऽहं हुँ फट् स्वाहा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam DIgital Preservation Foundation, Chandigarh

ध्यानम्

भीमां विकीर्ण-केशां च ध्यायेन्नित्यां मितांशुभाम्,
कृष्णवर्णा रक्त-वस्त्रां शवासीनां भयानकाम् ।।
मुण्डमाला धरां दिव्यां धारयन्तीं चतुर्भुजैः ।
चन्द्रहासं मस्तकं च वरं चैवाभयं तथा ।।

मंत्र साधन के हेतु जाप का दशांश हवन, तदुपरान्त दशांश तर्पण दशांश मार्जन तथा मार्जन का दशांश ब्राह्मण

बटुकपूजनम्

श्रीं ह्रीं क्लीं प्राङ्निमन्त्रितं बटुकमाहूय तं गणपति रूपं विभाव्य ३बं बटुकाय अर्घ्यं कल्पयामि नमः ।

इत्यादिरीत्या, अर्घ्य-आचमन-स्नानवस्त्र-यज्ञोपवीतगन्ध-पुष्प-धूप-दीपं-नैवेद्य-ताम्बूलानि दद्यात् ।।

सुवासिन्या पूजनम्

यथा प्राङ्निमन्त्रितां काली रूपिणीं दीक्षितां सुवासिनीं प्रक्षालित पादामासनं उपवेशयेत् ।

सा चेद्दीक्षिता तदा ऐं ह्रीं श्रीं क्रीं हूँ ह्रीं दक्षिण कालिकाम्बायै नमः इमांशक्ति पवित्रा कुरु मम शक्ति

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कुरु स्वाहा इत्यभिषेक मन्त्र पूर्वकं सामान्यार्घ्यसलिलेन त्रिःशक्तिं सम्प्रोक्ष्य ३ ओं शान्तिरस्तु शिवञ्चास्तु प्रणश्यत्वशुभञ्च यत् यत एवागतं पापं तत्रैव प्रतिगच्छतु इत्युच्चार्य तस्याः कर्णे हृल्लेखाँ जपेत् ।

अथ तां देवतारूपां विभाव्य ३क्लीं हूँ ह्रीं शक्त्यै अमुकं समर्पयामि इति मन्त्रेण हरिद्रा कुंकुम चन्दन पट्टवासः पुष्प धूप दीप नैवेद्य ताम्बूलानि वसनाभरणानि च दद्यात् ।

श्री देव्यै आवरण देवताभ्यश्च दत्तपुष्पाञ्जल्या तस्याः करे विशेषार्घ्यांदमृतं पात्रान्तरे कृत्वा समर्पयेत् ।

साभ्युत्थाय तदादाय शिरशि गुरु पादुकामन्त्रेण गुरुं त्रिरिष्टवा हृदि देवीञ्च सन्तर्प्य मूलेन गुर्वाज्ञाँ गृहीत्वा मूलान्ते सर्वं तत्वं शोधयामि नमः स्वाहा इति मन्त्रेण सर्वं तत्वं संशोधयेत् ।

ततश्च तत्स्वीकुर्य्यात् । पश्चात्ताँ भोजयित्वा ताम्बूल-दक्षिणादिभिः सन्तर्प्य विसृजेत् ।

॥ अथ कुमारी पूजा ॥

यजमानः पूजयेच्च कन्यानां नवकं शुभं ॥
द्विवर्षाद्या दशा द्वान्ताः कुमारीः परिपूजयेत् ॥१॥
अर्थादेकहायनाल्पवयस्कावर्ज्याः ॥
ता आसने उपवेश्यावाहयेत् मन्त्रेण ॥
मन्त्राक्षर मयीं लक्ष्मीं मातृणाम रूपधारिणीम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

नवदुर्गात्मिकाँ साक्षात्कन्यामावाहयाम्यहम् ।।

अनेनैव मन्त्रेण नवापि आवहयेत् ।।

अशक्तौ यथाशक्ति एकामपि अथ नवानाम् पूजा वन्त्माः ।।

द्विहायना कुमारि संज्ञकाः ।।

सर्वस्वरूपे सर्वेशे शर्वशकि स्वरूपिणि ।।

पूजाँ गृहाण कौमारि जगन्मातर्नमोस्तुते ।।२।।

त्रिपुराँ त्रिपुरा धाराँ त्रिवर्गा ज्ञानरूपिणीं ।।

त्रैलोक्य वंदिताँ देवीं त्रिमूर्ति पूजयाह्मयहम् ।।३।।

चतुर्वर्षा कल्याणि तत्पूजा मन्त्रः ।।

कलात्मिकाँ कलातीताँ कारुण्यहृदयाँ शिवाम् ।।

कल्याण जननीं देवी कल्याणीं पूजयाम्यहं ।।४।।

पंचवर्षा रोहिणीतत् पूजा मन्त्रः ।।

अणिमादि गुणधारा मकाराधेक्षरा त्मिकाम् ।।

अनन्ताँ शक्तिकाँ लक्ष्मीं रोहिणीं पूजयाम्यह्म ।।५।।

षडवर्षाकालिका तत्पूजा मन्त्रः ।।

कामचारा शुभा कान्ता काल चक्र स्वरूपिणीं ।।

कामदा करुणोदारा कालिका पूजयाम्यह्म ।।६।।

सप्तवर्षा चंडिका तत्पूजा मन्त्रः ।।

चंडबीरा चंडरूपा चंडमुण्ड प्रभंजनी ।।

पूजयामि सदा देवीं चंडिका चंड विक्रमाम् ।।६।।

अष्ट वर्षाशाभवी तत् पूजा मन्त्रः ।।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

सदानन्दकरीं शांतां सर्वदेव नमस्कृताम् ।।
सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ।।
नवहायना दुर्गा तत् पूजा मन्त्रः ।।
दुर्गमे दुस्तरेहैकार्यें भवदुःख विनाशिनीम् ।।
पूजयामि सदा भक्त्या दुर्गा दुर्गतिनाशिनीम् ।।८।।
दशवर्षा सुभद्रां तत् पूजा मन्त्रः ।।
सुन्दरीं स्वर्ण वर्णाभां सुख सौभाग्यदायिनीम् ।।
सुभद्र जननीं देवीं सुभद्रांपूजयाम्यहम् ।।१०।।

इति प्रत्येक मन्त्रान्ते तत्तभाम् मन्त्रेण नवापि षोडशोपचारैः पंचोपचारैर्वा पूजयेत् इति ।।

बलिधानविधिः

यथा-देव्या दक्षभागे सामान्योदकेन त्रिकोणवृत्त चतुरस्रात्मकं मण्डलं परिकल्प्य, ३ ऐं व्यापकमण्डलाय नमः इति गन्धाक्षतैरभ्यर्च्य, अर्घ्यभक्त पूरितोदकं सक्षीरादित्रयंपात्रं तत्र विन्यस्य ३ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्व भूतेभ्यो हुँ फट् स्वाहा इति मन्त्रं त्रिः पठित्वा दशकरार्पितं वामकरतत्वमुद्रास्पृष्टं सलिलं बल्युपरि दत्वा वामपार्ष्णिघात करास्फोटौ कुर्वाणः समुदञ्चित वक्त्रो वाणमुद्रया बलिं भूतैः ग्रासितं विभाव्य प्रणमेत् ।

* इतिबलिदानविधिः *

—

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ततः साधकः समाहितचेता भगवत्याः श्री दक्षिण कालिकायाः पंचाग सहितं कुर्यात् । तद्यथा-

अथ कवचम्-

इस प्रकार साधको एकाग्रचित होकर भगवती श्री दक्षिण कालिका पंचाग का पाठ करना चाहिये ।

-❀-

अथ श्री दक्षिण कालिका पंचांग प्रारम्भ

अथ् कालिका कवचम्

कैलास शिखरासीनं देवदेव जगद्गुरुम् ।
शङ्कर परिपप्रच्छ पार्वती परमेश्वरम् ॥१

❀ पार्वत्युवाच ❀

भगवान् देवदेवेश देवानां भोगद प्रभो ! ।
प्रब्रूहि मे महादेव ! गोप्य चेद्यदि हे प्रभो ॥२
शत्रूणां येन नाशः स्यादात्मनो रक्षणं भवेत् ।
परमैश्वर्यमतुलुं लभेद्येन हि तद्वद ॥३

❀ भैरव उवाच ❀

वक्ष्यामि ने महादेवि ! सर्वधर्म विदाम्बरे ! ।
अद्भुतं कवचं देव्याः सर्व काम प्रसाधकम् ॥४
विशेषतः शत्रु नाश सर्व रक्षाकरं नृणाम् ।
सर्वारिष्ट प्रशमनं सर्वभद्र विनाशनम् ॥५
सुखदं भोगदं चैव वशीकरणमुत्तमम् ।
शत्रु सङ्घाः क्षय यान्ति भवन्ति व्याधिपीडिता॥६

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

दुःखिनो ज्वरिणश्चैव स्वाभीष्टं द्रोहिणस्तथा ।
भोगमोक्ष प्रदं चैव कालिका कवचं पठेत् ॥७

विनियोग:

ॐ अस्य श्री कालिकाकवचस्य भैरव ऋषिः, अनुष्टुप्छन्दः, श्री कालिका देवता, जपे विनियोगः ।

ॐ ध्यायेत्कालीं महामायां त्रिनेत्रां बहु रूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम ॥८
नीलोत्पलदलश्यामां शत्रुसङ्घविदारिणीम् ।
नरमुण्ड तथा खड्गं कमलं च वरं तथा ॥९
निर्भयां रक्तवदनां दंष्ट्रालीघोररूपिणीम् ।
साट्टहासाननान्देवीं सर्वदाञ्च दिगम्बरीम् ॥१०
शवासनस्थितां कालीं मुण्डमाला विभूषिताम् ।
इति ध्यात्वा महाकालीं ततस्तु कवचं पठेत् ॥११
ॐ कालिका घोररूपा सर्वकाम प्रदा शुभा ।
सर्वदेवस्तुता देव शत्रुनाश करोतु मे ॥१२
ॐ ह्रीं ह्रीं रूपिणी चैव ह्रां ह्रीं रूपिणीं तथा ।
ह्रां ह्रीं क्षों क्षौं स्वरूपा सा सदा शत्रून्विदारयेत् ॥१३
श्रीं ह्रीं ऐं रूपिणी देवी भवबन्धविमोचनी ।
हुंरूपिणी महाकाली रक्षास्मान् देवि सर्व ॥१४
यया शुम्भो हतो दैत्यो निशुम्भश्च महासुरः ।
वैरिनाशाय वन्दे तां कालिकां शंकरप्रियाम् ॥१५
ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहका ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कौमार्यैन्द्री चामुण्डा खादन्तु मम विद्विषः ॥१६

सुरेश्वरी घोर रूपा चण्डमुण्ड विनाशनी ।
मुण्डमालावृताङ्गी च सर्वतः पातु मां सदा ॥१७

ह्रीं ह्रीं ह्रीं कालिके घोरे दंष्ट्रे व रुधिरप्रिये ।
रुधिरापूर्णवक्त्रे च रुधिरेणावृतस्तनि ! ॥१८

मम शत्रून् खादय खादय हिंस हिंस मारय मारय
भिन्धि भिन्धि छिन्धि-छिन्धि उच्चाटय उच्चाटय
द्रावय द्रावय शोषय शोषय स्वाहा ।
ह्रां ह्रीं कालिकायै मदीय शत्रून् समर्पयामिस्वाहा ॥
ॐजय जय किरि किरि किटि किटि कट कट मर्द-मर्द
मोहय मोहय हर हर मम रिपून् ध्वंस ध्वंस
भक्षय भक्षय त्रोटय त्रोटय यातुधानान् चामुण्डे !
सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो मम
वश्यान् कुरु कुरु तनु तनु धान्यं धनं मेऽश्वान्
गजान् रत्नानि दिव्यकामिनीः पुत्रान् राजश्रिय
देहि देहि यच्छ क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्वाहा ।

इत्येतत्कवचं दिव्यं कथितं शम्भुना पुरा ।
ये पठन्ति सदा तेषां ध्रुवं नश्यन्ति शत्रवः ॥१९

वैरिणः प्रलयं यन्ति व्याधिता वा भवन्ति हि
बलहीनाः पुत्रहीनः शत्रवस्तस्य सर्वदा ॥२०

सहस्र पठनात्सिद्धिः कवचस्य भवेत्तदा ।
तत्कार्याणि च सिध्यन्ति यथा शंकर भाषितम् ॥२१

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

श्मशानाङ्गारमादाय चूर्णं कृत्वा प्रयत्नतः ।
पादोदकेन पिष्ट्वा तल्लिखेल्लोहशलाकया ॥२२
भूमौ शत्रून् हीनरूपानुत्तराशिरसस्तथा ।
हस्तं दत्वा तु हृदये कवच तु स्वयं पठेत् ॥२३
शत्रोः प्राणप्रतिष्ठां तु कुर्यान्मंत्रेण मन्त्रवित् ।
हन्यादस्त्र प्रहारेण शत्रो ! गच्छ यमक्षयम् ॥२४
ज्वलदङ्गारतापेन भवन्ति ज्वरिता भृशम् ।
प्रोञ्छनैर्वामपादेन दरिद्रो भवति ध्रुवम् ॥२५
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम् ।
परमैश्वर्यदं चैव पुत्रपौत्रादि वृद्धिदकम् ॥२६
प्रभातसमये चैव पूजाकाले च यत्नतः ।
सायकाले तथा पाठात्सर्वसिद्धिर्भवेद्ध्रुवम् ॥२७
शत्रुच्चाटनं याति देशाद्वा विच्युतो भवेत् ।
पश्चात्किङ्करतामेति सत्यं सत्यं न संशयः ॥२८
शत्रुनाशकरे देवि ! सर्वसम्पत्करे शुभे ।
सर्वदेवस्तुते देवि ! कालिके ! त्वां नमाम्यहम् ॥२९

❀इति श्रीरुद्रयामले कालिकाकल्पे कालिकाकवचंसंपूर्णम्❀

कवच शरीर की रक्षा के लिए होता है ।

❀ अथ श्री जगन्मङ्गल महाकाली कवचं प्रारम्भम् ❀

श्री भैरव्युवाच

कालीपूजा श्रुता नाथ ! भावाश्च विविधाः प्रभो ! ।
इदानीं श्रोतुमिच्छामि कवचम्पूर्व सूचितम् ॥१

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

त्वमेव स्रष्टा पाता च संहर्ता च त्वमेवहि ।
त्वमेव शरणं नाथ ! त्राहि मां दुःख सङ्कटात् ॥२

❀ भैरव उवाच ❀

रहस्यं शृणु वक्ष्यामि भैरवि ! प्राण वल्लभे !
श्री जगन्मङ्गलन्नाम कवचम्मन्त्रविग्रहम् ॥३
पठित्वा धारयित्वा च त्रैलोक्यम्मोहयेत्क्षणात् ।
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरम् ॥४
योगिनं क्षोभमनयद्यद्धृत्वा च रघूत्तमः ।
वरतृप्तो जघानैव रावणादिनिशाचरान् ॥५
यस्य प्रसादादीशोऽहं त्रैलोक्य विजयी विभुः ।
धनाधिपः कुबेरोऽपि सुरेशोऽभूच्छचीपतिः ॥६
एवं हि सकला देवाः सर्वसिद्धीश्वराः प्रिये ! ।
श्री जगन्मङ्गलस्याऽस्य कवचस्य ऋषिः शिवः ॥७
छन्दोऽनुष्टुब्देवता च कालिका दक्षिणेरिता ।
जगताम्मोहने दुष्टविजये भुक्तिमुक्तिषु ॥८
योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः ।
शिरो मे कालिका पातु क्रीङ्कारैकाक्षरी परा ॥९
क्रीं क्रीं क्रीं ललाटञ्च कालिका खड्गधारिणी ।
हूँ हूँ पातु नेत्र युग्मं ह्रीं ह्रीं पातु श्रुती मम ॥१०
दक्षिणे कालिका पातु घ्राणयुग्मम्महेश्वरी ।
क्रीं क्रीं क्रीं रसनाम्पातु हूँ हूँ पातु कपोलकम् ॥११
वदनं सकलम्पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा ।।१२
खड्गमुण्ड धरा काली सर्व्वांगमभितोऽवतु ।
क्रीं हूँ ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयम्मम ।।१३
ऐं हूँ ओं ऐं स्तनद्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलम् ।
अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका ।।१४
क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं कारी पातु षडक्षरी मम ।
क्रीं नाभिम्मध्यदेशञ्च दक्षिणे कालिकाऽवतु ।।१५
क्रीं स्वाहा पातु पृष्ठञ्च कालिका सा दशाक्षरी ।
क्रीं मेगुह्यं सदा पातु कालिकायै नमस्ततः ।।१६
सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता ।
ह्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयम् ।।१७
काली दशाक्षरी विद्या स्वाहा मामूरुयुग्मकम् ।
ॐ क्रीं क्रीं मे स्वाहा पातु कालिका जानुनी ।।१८
काली हृन्नामविद्येयञ्चातुर्वर्ग्गफलप्रदा ।
क्रीं ह्रीं ह्रीं पातु सा गुल्फन्दक्षिणे कालिकाऽवतु ।।१९
क्रीं ह्रीं हूं ह्रीं स्वाहा पदम्पातु चतुर्दशाक्षरी मम् ।
खड्गमुण्डधरा काली वरदाभय धारिणी ।।२०
विद्याभिः सकलाभिः सा सर्वांगमभितोऽवत् ।
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।।२१
विप्रचित्ता तथोग्रोग्रप्रभादीप्ता घनत्विषा ।
नीला घना बलाका च यात्रामिता च माम् ।।२२
एताः सर्वाः खड्गधरा मुण्डमाला विभूषणाः ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

रक्षन्तु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा ।।२३
माहेश्वरी च चांमुण्डा कौमारी चाऽपराजिता ।
वाराही नारसिंह च सर्वाश्चामित भूषणाः ।।२४
रक्षन्तु स्वायुधैर्दिक्षु विदिक्षु मां यथा तथा ।
इति ते कथितन्दिव्यं कवचम्परमाद्भुतम् ।।२५
श्री जगन्मंगलन्नाम महाविद्यौध विग्रहम् ।
त्रैलोक्याकर्षणम्ब्रह्मन् ! कवचं मन्मुखोदितम् ।।२६
गुरुपूजाम्विधायाऽथ विधिवत्प्रपठेत्ततः ।
कवचन्त्रिः सकृद्वाऽपि यावज्जीवञ्च वा पुनः ।।२७
एतच्छतार्द्धमावृत्या त्रैलोक्य विजयी भवेत् ।
त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः ।।२८
महाकवि र्भवेन्मासं सर्वसिद्धीश्वरो भवेत् ।
पुष्पाञ्जलीन्कालिकायै मूलेनैवाऽर्पयेत्सकृत् ।।२९
शतवर्ष सहस्राणाम्पूजायाः फलमाप्नुयात् ।
भूर्जे विलिखितञ्चैतत्स्वर्णस्थं धारयेद्यदि ।।३०
शिखायान्दक्षबाहौ कण्ठे वा धारयेद्यदि ।
त्रैलोक्यम्मोहयेत्क्रोधात्त्रैलोक्यञ्चूर्णयेत्क्षणात् ।।३१
पुत्रवान्धनवाञ्छ्रीमान्नाना विद्या निधिर्भवेत् ।
ब्रह्मास्त्रा दीनि शस्त्राणि द्गात्र स्पर्शनात्ततः ।।३२
नाशमायाति या नारी वन्ध्या वाऽमृतपुत्रिणी ।
बह्वपत्या जीवलोका भवत्येव न संशयः ।।३३
न देयम्पर शिष्येभ्यो ह्यभक्तेभ्यो विशेषतः ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शिष्येभ्यो भक्तियुक्तेभ्य ह्यन्यथा मृत्यु माप्नुयात् ।।३४
स्पर्द्धामुध्दूय कमला वाग्देवी मन्दिरे सुखे ।
पौत्रान्तं स्थैर्य्य मास्थाय निवसत्येव निश्चलम् ।।३५
इदकं वचमज्ञात्वा यो भजेद्घोर दक्षिणम् ।
शतलक्षम्प्रजप्त्वाऽपि तस्य विद्या न सिध्यति ।
सहस्त्रघात माप्नोति सोऽचिरान्मृत्यु माप्नुयात् ।।३६
जपेदादौ जपे दन्ते सप्तवाराण्यनुक्रकात् ।
नोधृत्य यत्र कुत्रापि गोपनीयं प्रयत्नतः ।।३७
लिखित्वा भूर्जपत्रे वै पूजा काले तु साधकः ।
मूर्ध्नि धार्यं प्रयत्नेन विद्यारत्नं प्रपूजयेत् ।।३८

❀ इति श्री जगन्मंल कालीकवचं समाप्तम् ❀

❀-❀-❀

आद्या श्री कालिका त्रैलोक्य-विजय कवचं

मुण्ड माला धरान्देवी ललज्जिह्वान्दिगम्बराम् ।
एवं सञ्चिन्तयेत्कालीं श्मशानालय वासिनीम् ।।

❀ श्री शिव उवाच ❀

विनियोगः

त्रैलोक्य-विजयस्य कवचस्य शिवः ऋषिः, अनुष्टुप् छन्दः; आद्या श्री काली देवता, क्रीं बीजं हूँ शक्ति, ह्रीं कीलकं, कामनासिद्धये विनियोगः ।।

—❀—

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

आद्या श्री कालिका त्रैलोय-विजयक वच प्रारम्भ

❀ श्री शिव उवाच ❀

क्रीं आद्या मे शिरः पातु हूँ काली वदनं मम ।
ह्रदयं ह्रीं परा-शक्तिः पायात् कण्ठं परात्परा ॥१
नेत्रे पातु जगद्धात्री कर्णौ रक्षतु शङ्करी ।
घ्राणं पातु महा-माया रसना सर्व-मंगला ॥२
दन्तान् रक्षतु कौमारी कपोलौ कमलालया ।
ओष्ठाधरौ क्षमा रक्षेत् चिबुकं चारु-हासिनी ॥३
ग्रीवां पायात् कुलेशानी ककुत् पातु कृपा-मयी ।
द्वौ बाहू बाहुदा रक्षेत् करौ कैवल्य-दायिनी ॥४
स्कन्धौ कपर्दिनी पातु पृष्ठं त्रैलोक्य-तारिणी ।
पार्श्वे पायादपर्णा मे कटिं मे कमठासना ॥५
नाभौ पातु विशालाक्षी प्रजा-स्थानं प्रभावती ।
उरु रक्षतु कल्याणी पादौ मे पातु पार्वती ॥६
जयदुर्गाऽवतु प्राणान् सर्वाङ्गं सर्व-सिद्धिदा ।
रक्षा-हीनं तु यत् स्थानं वर्जितं कवचेन च ॥७
तत् सर्वं मे सदा रक्षेदाद्या काली सनातनी ।
इति ते कथितं दिव्यं त्रैलोक्य-विजयाभिधम् ॥८
कवचं कामिका-देव्या आद्यायाः परमाद्भुतम् ॥

—❀—

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

फल श्रुति

पूजा-काले पठेद् यस्तु आद्याधिकृत-मानसः ।
सर्वान् कामानवाप्नोति तस्याद्या सुप्रसीदति ॥९
मन्त्र-सिद्धिर्भवेदाशु किङ्कराः क्षुद्र-सिद्धयः ।
अपुत्रो लभते पुत्रं धनार्थी प्राप्नुयाद धनम् ॥१०
विद्यार्थी लभते विद्यां कामी कामानवाप्नुयात् ।
सहस्रावृत्ति - पाठेन वर्मणोऽस्य पुरस्क्रिया ॥११
पुरश्चरण-सम्पन्नं यथोक्त-फलदं भवेत् ।
चन्दनागरु-कस्तूरी-कुंकमै रक्त चन्दनैः ॥१२
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि ।
शिखायां दक्षिणे बाहौ कण्ठे वा साधकःकटौ ॥१३
तस्याद्या कालिका वश्या वांछितार्थं प्रयच्छति ।
न कुत्रापि भयं तस्य सर्वत्र विजयी कविः ॥१४
अरोगी चिर-जीवी स्यात् बलवान् धारण क्षमः ।
सर्व-विद्यासु निपुणः सर्व-शास्त्रार्थ-तत्व-वित् ॥१५
वशे तस्य मही-पाला भोग-मोक्षौकर-स्थितौ ।
कलि-कल्मष-युक्तानां निःश्रेयस-करं परम् ॥१६

जो साधक इसको प्रातःकाल उठकर यत्न के साथ अपने शरीर पर धारण करता है, उसको कभी अकाल मृत्यु नहीं होती; । वैसे ज्ञानीजन कवच को शरीर की रक्षा के निमित्त अपने शरीर पर धारण करते हैं ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

साधक नित्य ही आद्या श्रीकालिका त्रैलोक्य-विजय कवच का एक हजार बार एकांत में बैठकर पाठ, जप करता है। उसे मन चाही सिद्धि प्राप्त होती है। तथा वह धनवान्-विद्यावान्-यशवान्-संततिवान् होकर इस पृथ्वी पर तरह-तरह के सुखों को भोगकर अन्त में साधक परमपद कैलास को प्राप्त होता हैं। और वह जन्ममरण के फेर से मुक्त हो जाता है।

आद्या श्री कालीकवच में शिव ऋषि, अनुष्टुप छन्द, आद्या श्री काली देवता हैं, क्रीं बीज हूँ शक्ति, ह्लीं कीलक काम्यसिद्धि से निमित्त विनियोग करना।

आद्या कालिका के सभी मन्त्र 'सिद्ध मन्त्र' हैं। साधकों के लिए काली माँ भल-दायिनी कही गयी है।

❀—❀

इसके बाद साधकों कालीहृदय का पाठ करना चाहिए।

❀ अथ श्री काली हृदय प्रारम्भ ❀

❀ श्रीमहाकाला उवाच ❀

महाकौतूहल स्तोत्रं हृदयाऽऽख्यं महोत्तमम् ।
शृणु प्रिये ! महागोप्यन्दक्षिणायाः सुगोपितम् ॥१

अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितम् ।
अन्येभ्यः कुरु गोप्यञ्च सत्यं सत्यञ्च शैलजे ! ॥२

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

❀ श्री देव्युवाच ❀

कस्मिन् युगे समुत्पन्नं केन स्तोत्रं कृतम्पुरा ।
तत्सर्वं कथ्यतां शम्भो ! महेश्वर ! दयानिधे ।।३

❀ श्री महाकाल उवाच ❀

पुरा प्रजापतेः शीर्षश्छेदनं कृत वानहम् ।
ब्रह्महत्याकृतैः पापै भैरवत्वम्ममाऽऽगतम् ।।४
ब्रह्महत्याविनाशाय कृतं स्तोत्रम्मयाप्रिये ! ।
कृत्या विनाशकं स्तोत्रम्ब्रह्महत्यापहापकम् ।।५

❀ विनियोगः ❀

ॐअस्य श्री दक्षिणकाल्या हृदय स्तोत्रमन्त्रस्य-श्री महाकालऋषिरुष्णिक्छन्दः श्रीदक्षिणकालिका देवता क्रीं बीजं, ह्रीं शक्तिः, नमः कीलकम् सर्वत्र सर्वदा जपे विनियोगः ।

❀ अथ हृदयादि न्यासः ❀

ॐ क्रां हृदयाय नमः ।
ॐ क्रीं शिरसे स्वाहा ।
ॐ क्रूं शिखायै वषट् ।
ॐ क्रैं कवचाय हुम् ।
ॐ क्रौं नेत्रत्रयाय वौषट् ।
ॐ क्रः अस्त्राय फट् ।

—❀—

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ध्यायेत्कालीम्महामायान्त्रिनेत्राम्बहु रूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्र निभाननाम् ॥१
नीलोत्पल दल प्रख्यां शत्रुसङ्घ विदारिणीम् ।
नरमुण्डन्तथा खड्गं कमलं वरदं तथा ॥२
बिभ्राणां रक्तवदनां दंष्ट्रालीं घोर रूपिणीम् ।
अट्टा ट्टहास निरतां सर्वदा च दिगम्बराम् ॥३
शवासनस्थितां देवीम्मुण्डमालाविभूषिताम् ।
इति ध्यात्वा महादेवीं ततस्तु हृदयम्पठेत् ॥४
ॐ कालिकाघोररूपाद्या सर्वकामफल प्रदा ।
सर्व देवस्तुता देवी शत्रुनाशं करोतु मे ॥५
ह्रीं ह्रीं स्वरूपिणी श्रेष्ठा त्रिषुलोकेषु दुर्लभा ।
तव स्नेहान्मयाख्यातन्न देयं यस्य कस्यचित् ॥६
अथ ध्यानंसम्प्रवक्ष्यामि निशामय परात्मिके ! ।
यस्य विज्ञान मात्रेण जीवन्मुक्तो भविष्यति ॥७
नाग यज्ञोपवीताञ्च चन्द्रार्ध कृतशेखराम् ।
जटाजूटाञ्च सञ्चिन्त्य महाकाल समीपगाम् ॥८
एवन्न्यासादयः सर्वे ये प्रकुर्वन्ति मानवाः ।
प्राप्नुवन्ति च ते मोक्षं सत्यं वरानने ! ॥९
यन्त्रं शृणु परंदेव्याः सर्वार्थः सिद्धिदायकम् ।
गोप्याद्गोप्यतरं गोप्यं गोप्याद् गोप्यतरम्महत् ॥१०
त्रिकोणम्पञ्चाष्ट कमलाम्भूपुरान्वितम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

मुण्डपङ्क्तिञ्च ज्वालाञ्च कालियन्त्रं सुसिद्धिदम् ॥११
मन्त्रन्तु पूर्वं कथितन्धारयस्व सदाप्रिये ! ।
देव्या दक्षिणकाल्यास्तु नाममालान्निशामय ॥१२
काली दक्षिणकाली च कृष्णरूपापरात्मिका ।
मुण्डमाली विशालाक्षी सृष्टि संहारकारिका ॥१३
स्थिति रूपा महामाया योगनिद्रा भगात्मिका ।
भगसर्पिः पानरता भगोद्योता भगाङ्गजा ॥१४
आद्या सदानवा घोरा महातेजाः करात्मिका ।
प्रेतवाहा सिद्धलक्ष्मीरनिरुद्धा सरस्वती ॥१५
एतानि नाम माल्यानि ये पठन्ति दिने दिने ।
तेषां दासस्य दासोऽहं सत्यं सत्यं महेश्वरि ! ॥१६
कालीं कालहरां देवीं देवीं कंकाल बीज रूपिणीम् ।
कालरूपाङ्कलातीताङ्कालिकांदक्षिणाम्भजे ॥१७
कुण्डगोलप्रियान्देवीं स्वयम्भूकुसुमे रताम् ।
रतिप्रियाम्महारौद्रीं कालिकाम्प्रणमाम्यहम् ॥१८
दूतीं प्रियाम्महादूतीं दूतीं योगेश्वरीम्पराम् ।
दूतीयोगोद्भवरतान्दूती रूपान्नमाम्यहम् ॥१९
क्रीं मन्त्रेण जलं जप्त्वा सप्तधा सेचनेन तु ।
सर्वे रोगा विनश्यन्ति नाऽत्रकार्या विचारणा ॥२०
क्रीं स्वाहान्तैर्महामन्त्रैश्चन्दनं साधयेत्ततः ।
तिलकङ्क्रियते प्राज्ञैर्लोको वश्यो भवेत्सदा ॥२१
क्रीं हूँ ह्रीं मन्त्रजप्तेन चाक्षतं सप्तभिः प्रिये ! ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

महाभये विनाशश्च जायते नाऽत्र संशयः ॥२२

क्रीं ह्लीं हूँ स्वाहा मन्त्रेण श्मशानाग्निञ्च मन्त्रयेत् ।
शत्रोगृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति ॥२३

ह्लूं ह्लीं क्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा ।
रिपूणांचैव चोच्चाटनयत्येव न संशयः ॥२४

आकर्षणे क्रीं क्रीं क्रीं जप्त्वा अक्षतरुप्रतिक्षिपेत् ।
सहस्र योजनस्था च शीघ्रमाच्छिति प्रिये ॥२५

क्रीं क्रीं क्रीं हूँ हूँ च ह्लीं ह्लीं च कज्जल शोधितन्तथा ।
तिलकेन जगन्मोहं सप्तधा मन्त्रमाचरेत् ॥२६

हृदयम्परमेशानि ! सर्वपापहरम्परम् ।
अश्वमेधादियज्ञानां कोटि कोटि गुणोत्तरम् ॥२७

कन्यादानादिदानानां कोटि कोटि गुणंफलम् ।
दूती यागादि यागानां कोटि कोटि फलं स्मृतम् ॥२८

गंगादि सर्वतीर्थानां फलं कोटि गुणं स्मृतम् ।
एकधापाठमात्रेण सत्यं सत्य भयोदितम् ॥२९

कौमारी स्वष्टरूपेण पूजाङ्कृत्वा विधानतः ।
पठेत्स्तोत्रम्महेशानि ! जीवन्मुक्तः स उच्यते ॥३०

रजस्वला भगन्दृष्ट्वा पठेदेकाग्रमानसः ।
लभते परमं स्थानं देवीलोके वरानने ! ॥३१

महादुःखे महारोगे महा संकटके दिने ।
महाभये महाघोरे पठेत्स्तोत्रं महोत्तमम् ।
सत्यं सत्यं पुनः सत्यं गोपयेन्मातृजारवत् ॥३२

❀ इति श्रीकालीहृदय समाप्तम् ❀

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

हृदय के पाठोपरान्त शतनाम का पाठ करना चाहिए।

अथ श्रीककारादि कालिकाष्टोत्तर शतनाम प्रारम्भ

❀ भैरव उवाच ❀

शतनाम प्रवक्ष्यामि कालिकाया: वरानने !
यस्य प्रपठनाद्वाग्मी सर्वत्र विजयी भवेत् ॥१
काली कपालिनी कान्ता कामदा कामसुन्दरी।
कालरात्रिः कालिका च कालभैरव पूजिता ॥२
कुरुकुल्ला कामिनी च कमनीयस्व भाविनी।
कुलीनाकुलकर्त्री च कुलवर्त्म प्रकाशिनी ॥३
कस्तूरी रसनीला च काम्या कामस्वरूपिणी।
ककारवर्णनिलया कामधेनुः करालिका ॥४
कुलकान्ता करालास्या कामार्ता च कलावती।
कृशोदरी च कामाख्या कौमारी कुलपालिनी ॥५
कुलजा कुलकन्या च कलहा कलपूजिता।
कामेश्वरी कामकान्ता कुंजेरश्वरगामिनी ॥६
कामदात्री कामहर्त्री कृष्णा चैव कपर्छिनी।
कुमुदा कृष्णदेहा च कालिन्दी कुलपूजिता ॥७
काश्यपी कृष्णमाता च कुलिशांगी कला तथा।
क्रीं रूपा कुलगम्या च कमला कृष्णपूजिता ॥८
कृशंगी किन्नरी कर्त्री कलकण्ठी च कार्तिकी।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कम्बुकण्ठी कौलिनी च कुमुदा कामजीविनी ॥९
कुलस्त्री कीर्तिका कृत्या कीर्तिश्च कुलपालिका ।
कामदेवकला कल्पलता कामांगवर्द्धिनी ॥१०
कुन्ता च कुमुदप्रीता कदम्बकुसुमोत्सुका ।
कादम्बिनी कमलिनी कृष्णानन्द प्रदायिनी ॥११
कुमारी पूजनरता कुमारीगणशोभिता ।
कुमारीरञ्जनरता कुमारीव्रत धारिणी ॥१२
कंकाली कमनीया च कामशास्त्र विशारदा ।
कपाल खट्वांगधरा कालभैरव रूपिणी ॥१३
कोटरी कोटराक्षी च काशी कैलास वासिनी ।
कात्यायनी कार्यकारी काव्य शास्त्र प्रमोदिनी ॥१४
कामाकर्षणरूपा च कामपीठ निवासिनी ।
कंकिनी काकिनी कुत्सिता कलहप्रिया ॥१५
कुण्डगोलोद्भव प्राणा कौशिकी कीर्तिवर्द्धिनी ।
कुम्भस्तनी कटाक्षा च काव्या कोकनदप्रिया ॥१६
कान्तारवासिनी कान्तिः कठिना कृष्ण वल्लभा ।
इति ते कथितं देवि ! गुह्याद गुह्यतरम्परम् ॥१७
प्रपठेद्य इदं नित्यं कालीनामशताष्टकम् ।
त्रिषु लोकेषु देवेशि ! तस्याऽसाध्यन्न विद्यते ॥१८
प्रातःकाले च मध्याह्ने सायाह्ने च सदानिशि ।
यः पठेत्परया भक्त्या काली नाम शताष्टकम् ॥१९
कालिका तस्य गेहे च संस्थानं कुरुते सदा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शून्यागारे श्मशाने प्रान्तरे जलमध्यतः ॥२०
वह्निमध्ये च संग्रामे तथा प्राणस्य संशये ।
शताष्टकञ्जपन्मन्त्री लभते क्षेममुत्तमम् ॥२१
कालीं संस्थाप्य विधिवत्स्तुत्वा नामशताष्टकैः ।
साधकः सिद्धि साप्नोति कलिकायाः प्रसादतः ॥२२

❀ इति श्री कालिकाष्टोत्तर शतनाम समाप्तम् ❀

—❀—

श्री आद्या कालिका भगवत्याः ककारादि शतनाम स्तोत्रम्

शवारुढाम्महाभीमां घोर दंष्ट्रां हसन्मुखीम् ।
चतुर्भुजां खड्ग मुण्ड वराभय करां शिवाम् ॥
मुन्डमाला धरां देवीं ललज्जिह्वां दिगम्बराम् ।
एवं संचिन्तयेत् कालीं श्मशानालयवासिनीम् ॥

विनियोगः

अस्य स्तोत्रस्य ऋषिः सदाशिवः, छन्दो अनुष्टुप्,
देवता आद्या कालिका; धर्मार्थ-काम-मोक्षेषु ।

शिवउवाच

क्रीं काली हूँ कराली च ह्रीं कल्याणी कलावती ।
कमला कलि-दर्पघ्नी कपर्दीश-कृपान्विता ॥१
कालिका काल-माता च कालानल-सम द्युतिः ।
कपर्दिनी करालास्या करुणामृत-सागरा ॥२

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कृपा-मयी कृपाधारा कृपापारा कृपागमा ।
कृशानुः कपिला कृष्णा कृष्णानन्द-विवर्द्धिनी ॥३
काल रात्रिः काम रूपाकाम-पाश विमोचनी ।
कादम्बिनी कलाधारा कलि कल्मष नाशिनी ॥४
कुमारी-पूजन-प्रीता कुमारी पूजकालया ।
कुमारी-भोजनानन्दा कुमारी रूप धारिणी ॥५
कदम्ब-वन-सञ्चारा कदम्ब वन वासिनी ।
कदम्ब-पुष्प सन्तोषा कदम्ब पुष्प मालिनी ॥६
किशोरी कल कण्ठा च कलन्नाद निनादिनी ।
कादम्बरी पान रता तथा कादम्बरी प्रिया ॥७
कपाल-पात्र निरत्ता कङ्काल माल्य धारिणी ।
कमलासन सन्तुष्टा कमलासन वासिनी ॥८
कमलालय मध्यस्था कमलामोद मोदिनी ।
कल हंसःगतिः क्लैव्य नाशिनी काम रूपिणी ॥६
काम रूप कृतावासा काम पीठ विलासिनी ।
कमनीया कल्पता कमनीय विभूषणा ॥१०
कमनीय-गुणाराध्या कोमलाङ्गी कृशोदरी ।
कारणामृत सन्तोषा कारणानन्दसिद्धिदा ॥११
कारणानन्द-जापेष्टा कारणार्चन हर्षिता ।
कारणार्णव सम्मग्ना कारण-व्रत-पालिनी ॥१२
कस्तूरी सौरभामोदा कस्तूरी तिलकोज्वला ।
कस्तूरी पूजन रता कस्तूरी पूजक प्रिया ॥१३

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कस्तूरी-दाह-जननी कस्तूरी-मृग-तोषिणी ।
कस्तूरी-भोजन-प्रीता कर्पूरामोद-मोदिता ॥१४
कर्पूर-मालाभरणा कर्पूर-चन्दनोक्षिता ।
कर्पूर-करणाह्लादा कर्पूरामृत-पायिनी ॥१५
कर्पूर-सागर-स्नाता कर्पूर-सागरालया ।
कूर्च-बीज जप-प्रीता कूर्च-जाप-परायण ॥१६
कुलीना कौलिकाराध्या कौलिक-प्रिय-कारिणी ।
कुलाचारा कौतुकिनी कुल-मार्ग प्रदर्शिनी ॥१७
काशीश्वर कष्ट-हर्त्री काशीश वर दायिनी ।
काशीश्वर-कृतामोदा काशीश्वर-मनोरमा ॥१८
कल-मञ्जीर-चरणाक्वणत्-काञ्ची-विभूषणा ।
काञ्चनाद्रि-कृतागारा काञ्चनाचल-कौमुदी ॥१९
कामबीज जपानन्दा काम-बीज-स्वरूपिणी ।
कुमतिघ्नी कुलीनार्ति-नाशिनी कुल-कामिनी ॥२०
क्रीं ह्रूं ह्रीं-मन्त्र-वर्णेन काल-कण्टक-घातिनी ।
इत्याद्या-कालिका-देव्याः शतनाम प्रकीर्तितम् ॥२१
ककार-कूट-घटितं काल-रूप-स्वरूपकम् ॥२२

फलश्रुति

पूजा-काले पठेद्यस्तु कालिका-कृत-मानसः ।
मन्त्र-सिद्धिर्भवेदाशुस्मै काली प्रसीदति ॥
बुद्धिं विद्यां च लभते गुरोरादेश-मात्रतः ।
धनवान् कीर्ति-मान् भूयाद् दान शीलो दयान्वितः ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

पुत्र पौत्र सुखैश्वर्यैर्मोदते साधको भुवि ।
भौमावस्या निशा भागे म-पञ्चक-समन्वितः ॥
पूजयित्वा महाकाली माद्यां त्रिभुवनेश्वरीम् ।
पठित्वा शत नामानि साक्षात् काली मयो भवेत् ॥
नासाध्यं विद्यते तस्य त्रिषु लोकेषु किञ्चन ।
विद्यायां वाक् पतिः साक्षात् धने धनपति र्भवेत् ॥
समुद्र इव गाम्भीर्ये बले च पवनोपमः ।
तिग्मांशुरिव दुष्प्रेक्ष्यः शशिवच्छुभदर्शनः ॥
रूपे मूर्तिधरः कामो योषितां हृदयङ्गमः ।
सर्वत्र जयमाप्नोति स्तवस्यास्य प्रसादतः ॥
यं यं कामं पुरस्कृत्य स्तोत्रमेतदुदीरयेत् ।
तं तं काममवाप्नोति श्रीमदाद्या प्रसादतः ॥
रणे राजकुले द्यूते विवादे प्राण संकटे ।
दस्यु ग्रस्ते ग्राम दाहेसिंह व्याघ्रावृते तथा ॥
अरण्ये प्रान्तरे दुर्गे ग्रह राजभयेऽपि वा ।
ज्वर दाहे चिर व्याधौ महा रोगादि संकुले ॥
बाल ग्रहादि रोगे च तथा दुःस्वप्न दर्शने ।
दुस्तरे सलिले वापि पोते वात विपद् गते ॥
विचिन्त्य परमां मायामाद्यां कालीं परात्पराम् ।
यः पठेच्छत नामानि दृढ़ भक्ति समन्वितः ॥
सर्वापद्भ्यो विमुच्येत देवि सत्यं न संशयः ।
न पापेभ्यो भयं तस्य न रोगेभ्यो भयं क्वचित् ॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

सर्वत्र विजयस्तस्य न कुत्रापि पराभवः ।
तस्य दर्शन-मात्रेण पलायन्ते विपद्-गणाः ॥
स वक्ता सर्व-शास्त्राणां स भोक्ता सर्व सम्पदाम् ।
स कर्ता जाति-धर्माणां ज्ञातीनां प्रभुरेव सः ॥
वाणी तस्य वसेद् वक्त्रे कमलानिश्चला गृहे ।
तन्नाम्ना मानवाः सर्वे प्रणमन्ति ससम्भ्रमाः ॥
दृष्ट्या तस्य तृणायन्ते ह्यणिमाद्यष्ट-सिद्धयः ।
आद्या काली-स्वरूपाख्यं शत-नाम प्रकीर्तितम् ॥
अष्टोत्तर-शतावृत्या पुरश्चर्याऽस्य गीयते ।
पुरस्क्रियान्वितं स्तोत्रं सर्वाभीष्ट-फल-प्रदम् ॥
शतनाम-स्तुतिमिमामाद्या काली स्वरूपिणीम् ।
पठेद् वा पाठयेद् वापि शृणुयाच्छ्रावयेदपि ॥
सर्व पाप विनिमुक्तो ब्रह्म-सायुज्यमाप्नुयात् ॥

यह स्तोत्र स्वयं शिवा ने शिव अर्थात् काली को सुनाया था । यह स्तोत्र जिसका पाठ या श्रवण करने से व्यक्ति सर्व सिद्धियों का स्वामी होता है । इस स्तोत्र के द्वारा असौभाग्य का नाश और सुख सम्पत्ति की वृद्धि होती है । यह अकाल मृत्यु को दूर करता है, और आपत्तियों का निवारण करता है । इस स्तोत्र का नित्य प्रति पाठ करने से आद्या काली देवी बहुत जल्दी प्रसन्न होकर साधक को अपना सान्निध्य और अपना स्वरूप प्रदान करती है । शंकर भगवान इसी

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

स्तोत्र के कारण 'त्रिपुरारि' कहे जाते हैं।

इस स्तोत्र में सदाशिव ऋषि है तथा अनुष्ट छन्द है इसमें देवता स्वयं आद्या काली है। यह स्तोत्र ककार राशि से घटित काली के स्वरूप के समान है। इस स्तोत्र का पाठ पूजा काल में करना चाहिये। काली तभी प्रसन्न होती है जब गुरु से दीक्षित होकर साधक उसकी साधना करता है। बिना गुरु के काली की उपासना अनिष्ट को प्रदान करती है। साधक को काली धन, यश, पुत्र पौत्र और सुख ऐश्वर्य से परिपूर्ण कर देती हैं। इस स्तोत्र का पाठ करने से मनुष्य राजसभा में पूजित होता है: जुआ में विजयी होता है। हिंसक जानवरों का भय नहीं होता, सर्वत्र विजय को प्रदान करता है।

❀ ❀ ❀

कालिका शतनाम का पाठ करने के उपरान्त साधक को कालिका सहस्त्रनाम स्तोत्र का पाठ करना चाहिए क्योंकि उपनिषद् और पुराणों में ऐसा कहा गया है। कि सहस्त्रनाम ही भगवती काली का शरीर है। इसलिये सहस्त्रनाम स्तोत्र का पाठ साधक को यत्न के साथ करना चाहिये। जो साधक मन लगाकर यत्न से पाठ करता है। उस पर काली माँ बड़ी जल्दी प्रसन्न होकर दर्शन देती है और साथ में इच्छित फल प्रदान करती हैं।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कालिका सहस्रनाम स्तोत्र

श्मशान कालिका भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥१
कालिका रात्रिश्च महाकालनितम्बिनी ।
कालभैरव भार्या च कुलवर्त्मप्रकाशिनी ॥२
कामदा कामिनी कन्या कमनीय स्वरूपिणी ।
कस्तूरीरस लिप्तांगी कुञ्जरेश्वर गामिनी ॥३
ककारवर्ण सर्वांगी कामिनी कामसुन्दरी ।
कामार्त्ता कामरूपा च कामधेनुः कलावती ॥४
कांता कामस्वरूपा च कामाख्या कुलकामिनी ।
कुलीना कुलवत्यम्बा दुर्गा दुर्गति नाशिनी ॥५
कौमारी कलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशांगी क्रीं क्रींकारी कमला कला ॥६
करालास्या कराली च कुलकांता पराजिता ।
उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥७
नीला घना मेघनादा मात्रा मुद्रा मिताम्मिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥८
माहेश्वरी च चामुण्डा वाराही नारसिंहका ।
वज्रांगी वज्र कंकाल नृमुण्डस्रग्विणीविा ॥९
मालिनी नरमुण्डाली गलद्रक्त विभूषणा ।
रक्तचन्दन सिक्तांगी सिंदूरारुणमस्तका ॥१०
घोररूपा घोरद्रंष्ट्रा गोरा घोरतरा शुभा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

महादंष्ट्रा महामाया सुन्दरी युगदन्तुरा ॥११
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।
शारदेन्दु प्रसन्नास्या स्फुरत् स्मेराम्बुजेक्षणा ॥१२
अट्टहासा प्रफुल्लास्या स्मेरवक्त्रा सुभाषिणी ।
प्रफुल्ल पद्मवदना स्मितास्या प्रियभाषिणी ॥१३
कोटराक्षी कुलश्रेष्ठा महती बहु भाषिणी ।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥१४
सुकेशी मुक्तकेशी च दीर्घकेशी महाकचा ।
प्रेतदेहाकर्णपूरा प्रेतपाणिः सुमेखला ॥१५
प्रेतासना प्रियप्रेता पुण्यदा कुलपण्डिता ।
पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥१६
पूता पवित्रा परमा परा पुण्य विभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी ॥१७
नृमुण्डहस्ता शान्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शांता पीनोन्नतस्तनी ॥१८
दिगम्बरी घोररावा सृक्कान्तारक्तवाहिनी ।
घोररावा शिवासंगा निःसगा मदनातुरा ॥१९
मत्ता प्रमत्ता मदना सुधासिन्धु निवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षण कारिणी ॥२०
गीतप्रिया वाद्यरता प्रेतनृत्य परायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥२१
कात्यायनी जगन्माता जगती परमेश्वरी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥२२
जगज्जीववती हैमवती माया महालय ।
नाग यज्ञोपवीताङ्गी नागिनी नागशायिनी ॥२३
नागकन्या देवकन्या गान्धारी किन्नरी सुरी ।
मोहरात्रि महारात्रि दारुणाभा सुरासुरी ॥२४
विद्याधरी वसुमति यक्षिणी योगिनीजरा ।
राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥२५
श्रुतिस्मृति महाविद्या गुह्यविद्या पुरातनी ।
चिंताचिंता स्वधा स्वाहा निद्रा तंद्रा च पार्वती ॥२६
अपर्णा निश्चला लीला सर्वविद्या तपस्विनी ।
गंगा काशी शची सीता सती सत्यपरायणा ॥२७
नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टि धृतिः क्षमा ।
वाणी बुद्धिर्महालक्ष्मी लक्ष्मीर्नील सरस्वती ॥२८
स्रोतस्वती स्रोतवती मातंगी विजया जया ।
नन्दीसिन्धुः सर्वमयी तारा शून्य निवासिनी ॥२९
शुद्धा तरंगिणी मेधा लाकिनी बहुरूपिणी ।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥३०
सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी ।
रंकिणी टंकिणी चित्रा विचित्रा चित्ररूपिणी ॥३१
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ।
शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया ॥३२
भ्रान्तिर्भवानी रुद्राणी मृणानी शत्रुमर्दिनी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी ॥३३
सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ।
शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः पतिव्रता ॥३४
सर्वेश्वरी सर्वमता सर्वाणी हरवल्लभा ।
सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा ॥३५
कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ।
तामिस्रा यामिनीस्था च स्थिरा धीरा तपस्विनी ॥३६
चार्वङ्गी चंचला लोलजिह्वाचारु चारित्ररूपिणी ।
त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती ॥३७
सात्वतीधर्मनिष्ठा च श्रेष्ठा निष्ठुरवादिनी ।
गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसीघृणा ॥३८
भीमा भयानका भीमनादिनी भीः प्रभावती ।
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुः प्रियाः ॥३९
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ।
कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा ॥४०
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ।
मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ॥४१
रम्भोर्वशी रती रामा रोहिणी रेवती रमा ।
शंखिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ॥४२
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ।
पिनाक् धारिणी धूम्रा शरभी वनमालिनी ॥४३
वज्रिणी समरप्रीता वेगिनी रणपण्डिता ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

जटिनी बिम्बिनी नीला लावण्याम्बुधिचन्द्रिका ॥४४
वलिप्रिया सदा पूज्या पूर्णा दैत्येन्द्र माथिनी ।
महिषासुरसहन्त्री वासिनी रक्तदन्तिका ॥४५
रक्तपा रुधिराक्ताङ्गी रक्तखर्परहस्तिनी ।
रक्तप्रिया मांसरुचिरा सर्वदारक्तमानसा ॥४६
गलच्छोणित मुंडालिकण्ठमाला विभूषणा ।
शवासना चितान्तस्था माहेशी वृषवाहिनी ॥४७
वामदेवी महादेवी गौरी सर्वज्ञभाविनी ।
बालिका तरुणी वृद्धमाता जरातुरा ॥४८
सुभ्रू विलासिनी ब्रह्मवादिनी ब्राह्मणी मही ।
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ॥४९
अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुवादिनी ।
मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्त का ॥५०
मानदा मानिनी मान्या माननीया मदोद्धता ।
मदिरा मदिरोन्मादा मेध्या नव्या प्रसादिनी ॥५१
सुमेध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ।
जयदा जित्वरा जेत्री जयश्रीर्जयशालिनी ॥५२
सुखदा शुभदा सत्या सभासंक्षोभकारिणी ।
शिवदूती भूतिमती विभूति भीषणानना ॥५३
कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ।
कीर्तिर्यशस्विनी भूषा भूष्या भूतपति प्रिया ॥५४
सगुणा निर्गुणा धृष्ठानिष्ठा काष्ठा प्रतिष्ठदा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

धनिष्ठा धनदा धन्या वसुधा स्वप्रकाशिनी ॥५५
उर्वी गुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवना ॥५६
कामदेवकला रामाभिरामा शिवनर्तकी ।
चिन्तामणि कल्पलता जाग्रती दीनवत्सला ॥५७
कार्तिकी कीर्तिकाराध्या अयोध्याविषमासना ।
सुमंत्रा मंत्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥५८
त्रैलोक्य जननी हृष्टा निर्मांसा मनोरूपिणी ।
तडाग निम्नजठरा शुष्कमांसास्थि मालिनी ॥५९
अवन्ती मथुरा माया त्रैलोक्य पावनीश्वरी ।
व्यक्ताव्यक्तानेकमूर्तिः शर्वरी भीमनादिनी ॥६०
क्षेमंकरी शंकरी च सर्वसम्मोह कारिणी ।
अर्द्ध तेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥६१
अद्वैता भोगिनी पूज्या युवती सर्वमंगला ।
सर्वप्रियकरीं भोग्या धरणी पिशिताशना ॥६२
भयंकरी पापहरा निष्कलं वशंकरी ।
आशा तृष्णा चन्द्रकला निद्रा च वायुवेगिनी ॥६३
सहस्त्रसूर्यसंकाशा चन्द्रकोटि समप्रभा ।
वाह्निनी मन्डलासस्था च सर्वतत्व प्रतिष्ठता ॥६४
सर्वाचारवती सर्वदेवकन्याधिदेवता ।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिका ॥६५
इज्या पूज्या विभीभूर्तिः सत्कीर्तिब्रह्मरूपिणी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

रम्भोरुश्चतुरा राका जयन्ती करुणा कुहुः ॥६६
मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ।
ऋद्धिदा वृद्धिःदा वृद्धिः सर्वदा सर्वदायिनी ॥६७
आधार रूपिणी ध्येया मूलाधार निवासिनी ।
अज्ञा प्रज्ञा पूर्णमनाश्चन्द्रमुख्यनुकूलिनी ॥६८
वावदूका निम्ननाभिः सत्या संध्या दृढ़व्रता ।
आन्वीक्षिकी दंडनीति स्त्रयी त्रिदिवसुन्दरी ॥६९
ज्वलिनी ज्वालिनी शैलतनया विन्ध्यवासिनी ।
अमेया खेचरीधैर्या तुरीया विमलातुरा ॥७०
प्रगल्भा वारुणीच्छाया शशिनी विस्फूलिंगिनी ।
भुक्तिः सिद्धिः सदा प्राप्तिः प्रकाम्या महिमाणिमा ॥७१
इच्छासिद्धिर्विसिद्धा च वशित्वोध्वंनिवासिनी ।
लघिमा चैव गायत्री सावित्री भुवनेश्वरी ॥७२
मनोहरा चित्ता दिव्या देव्या देव्युदारा मनोरमा ।
पिंगला कपिला जिह्वारसज्ञारसिकारसा ॥७३
सुषुम्नेडा भोगवती गान्धारी नाडिका तथा ।
पाञ्चालीरुक्मिणी राधाराध्याभीमाधिराधिका ॥७४
अमृतातुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीरा जननी वीर सुन्दरी ॥७५
उग्रतारा यशोदाख्या दैवकी देवमानिता ।
निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥७६
कुलवागीश्वरी वाणी मातृका द्राविणा द्रवा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

योगेश्वरी महामारी भ्रामरी बिन्दुरूपिणी ॥७७
दूती प्राणेश्वरी गुप्ता बहुला चमरी प्रभा ।
कुब्जिका ज्ञानिनी ज्येष्ठा भुशंडी प्रकटाकृतिः ॥७८
द्राविणी गोपनी माया कामबीजेश्वरी क्रिया ।
शांभवी मेनकादेवी मूषलास्त्रा तिलोत्तमा ॥७९
अमेय विक्रमा क्रूरा सम्पत्शालात्रिलोचना ।
सुरश्री हव्यवहा प्रीतिरुष्मा धूम्रार्चिरंगदा ॥८०
तपिनी तापिनी विश्वा भोगदा धारिणीधरा ।
त्रिखण्डा बोधिनी वश्या सकला शब्दरूपिणी ॥८१
बीजरूपा महामुद्रा योगिनी योनि रूपिणी ।
अनंगकुसुमानगमेखलानंगरूपिणी ॥८२
वज्रेश्वरी च जयिनी सर्वद्वन्द्वक्षयंकरी ।
षडगयुवती योगयुक्ता ज्वालांशुमालिनी ॥८३
दुराशया दुराधारा दुर्जया दुर्गरूपिणी ।
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ॥८४
हंसेश्वरी त्रिकोणस्था शाकम्भर्यनुकम्पिनी ।
त्रिकोण निलया नित्या परमामृतरञ्जिता ॥८५
महाविद्येश्वरी श्वेता भेरुन्डा कुल सुन्दरी ।
त्वरिता भक्ति संसक्ता भक्तवश्या सनातनी ॥८६
भक्तानन्दमयी भक्तभाविका भक्तशंकरी ।
सर्व सौन्दर्य निलया सर्व सौभाग्य शालिनी ॥८७
सर्वसंभोगभवना सर्वसौख्य निरूपणी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कुमारीपूजनरता कुमारीव्रत चारिणी ॥८८
कुमारीभक्ति सुखिनी कुमारीरूपधारिणी ।
कुमारीपूजकप्रीता कुमारी प्रीतिदा प्रिया ।
कुमारी सेवकासंगा कुमारी सेवकालया ॥८९
आनन्दभैरवी बाला भैरवी बटुक भैरवी ।
श्मशान भैरवी काल भैरवी पुरभैरवी ॥९०
महाभैरवी पत्नी च परमानन्दभैरवी ।
सुधानन्दभैरवी च उन्मादानन्द भैरवी ॥९१
मुक्तानन्द भैरवी च तथा तरुण भैरवी ।
ज्ञानविन्द भैरवी च अमृतानन्द भैरवी ॥९२
महाभयंकरी तीव्रा तीव्रवेगा तपस्विनी ।
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ॥९३
त्रिपुरेशी पञ्चदशी पंचमी पुरवासिनी ।
महासप्तदशी चैव षोडशी त्रिपुरेश्वरी ॥९४
महांकुश स्वरूपा च महा चक्रेश्वरी तथा ।
नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ॥९५
राजराजेश्वरी धीरा महात्रिपुर सुन्दरी ।
सिन्दूर पूर रुचिरा श्रीमत्त्रिपुरसुन्दरी ॥९६
सर्वाङ्ग सुन्दरी रक्ता वस्त्रोत्तरीयिणी ।
जवा यावक सिन्दूर रक्तचन्दनधारिणी ॥९७
जावा यावक सिन्दूर रक्तचन्दनरूपधृक् ।
चामरी कुटिलभ्रू च निर्मला श्याम केशिनी ॥९८

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

बज्रमोक्तिक रत्नाढ्य किरीट मुकुटोज्वला ।
रत्नकुण्डल संसक्त स्फुरद्गण्ड मनोरमा ।।९९।।

कुंजेश्वर कुम्भोत्थ मुक्ता रंजित नासिका ।
मुक्ता विद्रुम माणिक्य हाराढय स्तनमण्डला ।।१००।।

सूर्यकान्तेदु कान्ताढय स्पर्शाश्मकंठभूषणा ।
बीजपूरस्फुरद्बीज दन्तपंक्तिरनुत्तमा ।।१०१।।

कामकोदण्डकाभुग्नभ्रूकटाक्ष प्रवर्षिणी ।
मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा ।।१०२।।

मनोज्ञ शुष्कली कर्णा हंसीगति दिडम्बिनी ।
पद्मरागांगद ज्योतिदाश्चतुष्क प्रकाशिनी ।।१०३।।

नानामणि परिस्फूर्जच्छद्र कांचन-कंकना ।
नागेन्द्रदत निर्माणवलयांकित पाणिनी ।।१०४।।

अंगुरीयक चित्रांगी विचित्र क्षुद्रघण्टिका ।
पट्टाम्बर परीधाना कल मंजीर शिंजिनी ।।१०५।।

कर्पुरागरुकस्तूरी कुंकुम द्रव लेपिता ।
विचित्र रत्न पृथिवी कल्प शाखि तलस्थिता ।।१०६।।
रत्नद्वीप स्फुरद्रवत सिंहासन विलासिनी ।
षटचक्र भेदनकरी परमानन्दरूपिणी ।।१०७।।

सहस्रदलपद्मन्तश्चन्द्रमण्डलवर्तिनी ।
ब्रह्मरूपशिव क्रीड़नाना सुखविलासिनी ।।१०८।।

हर विष्णु विरिंचीन्द्र ग्रह नायक सेविता ।
शिवा शैवा च रुद्राणी तथैव शिववादिनी ।।१०९।।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

मातंगिनी श्रीमती च तथैवानन्द मेखला ।
डाकिनी योगिनी चैव तथोप योगिनीमता ॥११०॥

माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ।
अलम्बुषा वेगवती क्रोधरूपासुमेखला ॥१११॥

गान्धारी हस्तिजिह्वा च इडा चैव शुभंकरी ।
पिंगला ब्रह्मदूती च सुषुम्ना चैव गंधिनी ॥११२॥

आत्मयोनिर्ब्रह्मयोनिर्जगद् योनिरयोनिजा
भगरूपा भगस्धात्री भगिनी भगरूपिणी ॥११३॥

मगात्मिका भगाधाररूपिणी भगमालिनी ।
लिंगाख्या चैव लिंगेशी त्रिपुराभैरवी तथा ॥११४॥

लिंगगीतिः सुगीतिश्च लिंगस्था लिंगरुपधृक् ।
लिंगमाना लिंगभवा लिंगलिंगा च पार्वती ॥११५॥

भगती कौशिकी च प्रेमा चैव प्रियंवदा ।
गृध्ररुपा शिवरुपा चक्रिणी चक्ररुपधृक् ॥११६॥

लिंगाभिधायिनी लिंगप्रिया लिंगनिवासिनी ।
लिंगस्थालिंगनी लिंगरुपिणी लिंगसुन्दरी ॥११७॥

लिंगगीतिर्महाप्रीता भगगीतिर्महासुखा ।
लिंगनामसदानन्दा भगनाम सदागतिः ॥११८॥

लिंगमाला कण्ठभूषा भगमाला विभूषणा ।
भगलिंगामृतप्रीता भगलिंगस्वरुपिणी ॥११९॥

भगलिंगस्य रुपा च भगलिंग सुखावहा ।
स्वयम्भू कुसुमप्रीता स्वयम्भू कुसुमार्चिता ॥१२०॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

स्वयम्भू कुसुमप्राणा स्वयम्भू पुष्पतर्पिता ।
स्वयम्भू पुष्पघटिता स्वम्भू पुष्पधारिणी ॥१२१॥

स्वयम्भू पुष्पतिलका स्वयम्भू पुष्प चर्चिता ।
स्वयम्भू पुष्पनिरता स्वयम्भू कुसुमग्रहा ॥१२२॥

स्वयम्भू पुष्पसंज्ञांशा स्वयम्भू कुसुमात्मिका ।
स्वयम्भू पुष्पनिचिता स्वयम्भू कुसुमप्रिया ॥१२३

स्वयम्भू कुसुमादान लालसोन्मत्तमानसा ।
स्वयम्भू कुसुमानन्वलहरी स्निग्धदेहिनी ॥१२४॥

स्वयम्भू कुसुमाधार स्वयम्भू कुसुमाकुला ।
स्वयम्भू पुष्पनिलया स्वयम्भू पुष्पं वासिनी ॥१२५॥

स्वयम्भू कुसुमस्निग्धा स्वयम्भू कुसुमात्मिका ।
स्वयम्भू पुष्पकरिणी स्वयम्भू पुष्पवाणिका ॥१२६॥

स्वयम्भू कुसुमध्याना स्वयम्भू कुसुमप्रभा ।
स्वयम्भ कुसुमज्ञाना स्वयम्भू पुष्पभागिनी ॥१२७॥

स्वयम्भू कुसुमोल्लासा स्वयम्भू पुष्पवर्षिणी ।
स्वयम्भू कुसुमोत्साहा स्वयम्भू पुष्परूपिणी ॥१२८॥

स्वयम्भू कुसुमोन्मादा स्वयम्भू पुष्पसुन्दरी ।
स्वयम्भू कुसुमाराध्या स्वम्भू कुसुमोद्भवा ॥१२९॥

स्वयम्भू कुसुमख्याग्रा स्वगम्भू पुष्पपूर्णिता ।
स्वयम्भू पूजक प्रज्ञा स्वयम्भू होतृ मातृका ॥१३०॥

स्वयम्भू दातृरक्षित्री स्वयभू रक्ततारिका ।
स्वयम्भू पूजकग्रस्ता स्वम्भू पूजकप्रिया ॥१३१॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

स्वयम्भू बन्वकाधारा स्वयम्भू निन्दकान्तका ।
स्वयम्भू प्रदसर्वस्वा स्वयम्भू प्रदपुत्रिणी ॥१३२॥
स्वयम्भूप्रद सस्मेरा स्वयम्भू प्रदशरीरिणी ।
सर्वकालोद्भव प्रीता सर्वकालोद्भवात्मिका ॥१३३॥

सर्वकालोद्भवोद्भावा सर्वकालोद्भवा ।
कुण्डपुष्प सदा प्रीति गोलि पुष्पसदारतिः ॥१३४॥

कुण्डगोलोद्भव प्राणा कुण्डगोलोद्भवात्मिका ।
स्वयम्भू वाशिवा धात्री पावनी लोकपावनी ॥१३५॥

कीर्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी ।
अश्विनी कृत्तिका पुष्पा तेजस्का चन्द्रमण्डला ॥१३६॥

सूक्ष्मा सूक्ष्मा बलाका च वरदा भयनाशिनी ।
वरदाभयदा चैव मुक्तिर्बन्ध विनाशिनी ॥१३७॥

कामुका कामदा कान्ता कामाख्य कलसुन्दरी ।
दुखदा सुखदा मोक्षा मोक्षदार्थं प्रकाशिनी ॥१३८॥

दुष्टादुष्टमतिश्चैव सर्विकार्य विनाशिनी ।
शुक्राधारा शुक्ररूपा शुक्रसिन्धु निवासिनी ॥१३९॥

शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः ।
शुक्रपूज्या शुक्रहोम सन्तुष्टा शुक्रवत्सला ॥१४०॥
शुक्रमूर्तिः शुक्रदेहा शुक्रपूजक पुत्रिणी ।
शुक्रस्था शुक्रणी शुक्र संस्पृहा शुक्रसुन्दरी ॥१४१॥
शुक्रस्नाता शुक्रकरीशुक्र सेव्यति शुक्रिणी ।
महाशुक्रा शुक्रभवा शुक्रबृष्टि विधायिनी ॥१४२॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शुक्राभिधेया शुक्रार्ता शुक्रवन्दक वन्दिता ।
शुक्रानन्दकरी शुक्रसदानन्दभिधायिका ॥१४३॥
शुक्रोत्सवा सदाशुक्रपूर्णा शुक्र मनोरमा ।
शुक्रपूजकसर्वस्वा शुक्र निन्दक नाशिनी ॥१४४॥
शुक्रात्मिका शुक्रसम्पदतत् शुक्राकर्षणकारिणी ।
शारदा साधक प्राणा साधका सक्तमानसा ॥१४५॥
साधकोत्तम सर्वस्वा साधकाभक्तरक्तपा ।
साधकानन्द सन्तोषा साधकानन्द कारिणी ॥१४६॥
आत्म विद्या ब्रह्म विद्या परब्रह्मस्वरूपणी ।
त्रित्रकूटस्था पंचकूटा सर्वकूट शरीरिणी ॥१४७॥
सर्ववर्णमयी वर्ण जप माला विधायिनी ॥१४८॥

फल श्रुति

इति श्री कालिका नाम सहस्रं शिवभाषितम् ।
गुह्याद्गुह्यतरं साक्षात् महापातक नाशनम् ॥१४९॥
पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि ।
लभते गाणपत्यं स यः पठेत् साधकोत्तमः ॥१५०॥
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदथ ।
सर्वपाप विनिर्मुक्ता: स याति कालिकापुरम् ॥१५१॥
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः स्मरेत् ।
दुर्गं दुर्गशतं तीर्त्वा स याति परमां गतिम् ॥१५२॥
बंध्या वा काकबंध्या वा मृतवत्सा च यांगना ।
श्रुत्वा स्तोत्रमिदं पूजान् लभते चिरजीविनः ॥१५३॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् ।
देवीपाद प्रसादेन तत्तदाप्नोति निश्चितम् ॥१५४॥

इति श्रीकालिकाकुल सर्वस्वे कालिका सहस्रनाम स्तोत्रं समाप्तम् ।

—*—

अथ ककारादि कालि सहस्रनाम

ध्यानम्

कालिका सहस्रनाम स्तोत्र के उपरान्त साधक को ककारादि काली सहस्रनाम स्तोत्र का पाठ करना चाहिये । क्योंकि ककारादि काली सहस्रनाम दक्षिणकालिका पद्धति के क्रमानुसार साधक को करना परमावश्यक माना गया है ।

शवारूढां महाभीमां घोर दंष्ट्रां हसन्मुखीम्,
चतुर्भुजां खगं मुण्डवराभयकरैर्युताम् ।
मुण्डमाला धरां देवीं जिह्वाललनभीषणाम्,
एवं संचिन्तयेत्काली श्मशानालय वासिनीम् ॥१॥

ॐ क्रीं काली कराली च कल्याणी कमला कला ।
कलाधारा कमलिनी ककारा करुणा कविः ॥२॥

ककार कोटि गुणिता ककार कोटि भूषणाः ।
ककार वर्ण सर्वांगी कला कोटि प्रभूषिता ॥३॥

ककारवर्ण हृदया ककार मनु मंडिता ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ककार वर्ण निलया काकशब्द परायण ।।४

ककार वर्ण मुकुटा ककार वर्ण भूषण ।
ककार वर्ण रूपा च कक्शब्द परायण ।।५

कक्वीराकालरता कमलाकरपूजिता ।
कमलाकर नाथा च कमलाकररूप धृक् ।।६

कमलाकर सिद्धिस्था कमलाकर पावदा ।
कमलाकर मध्यस्था कमलाकर तोषिता ।।७।।

कथंकार पदालापा कथंकार परायणा ।
कथंकार परान्तः स्था कथंकार पदार्थ भूः ।।८।।

कमलाक्षी कमलजा कमलाक्षः प्रपूजिता ।
कमलाक्षवरो द्युक्ता ककाराकर्बुराक्षरा ।।६।।

करताराकरच्छिन्ना करश्यामाकरार्णवा ।
कर पूज्याकररता करदाकर पूजिता ।।१०।।

करतोयाकरामर्षा कर्म नाशाकरप्रिया ।
करप्राणाकरकजाकर काकरकान्तरा ।।११।।

करकाचल रूपा च करकाचल शोभिनी ।
करकाचलपुत्री च करकाचल तोषिता ।।१२।।

करकाचल गेहस्था करकाचल रक्षिणी ।
करकाचल सम्मान्या करकाचल कारिणी ।।१३।।

करकाचल वर्षाढ्या करकाचल रंजिता ।
करकाचल कान्तारा करकाचल मालिनी ।।१४।।

करका चल भोज्या च करका चल रूपिणी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

करा मलक संस्था च करामलक सिद्धिदा ।।१५।।
करामलक संपूज्या करामलक तारिणी ।
करामलक काली च करामलक रोचिनी ।।१६।।
करामलक माता च करामलक सेविनी ।
करामलकवत् ध्येया करामलक दायिनी ।।१७।।
कंजनेत्रा कंजगतिः कंजस्था कंजधारिणी ।
कंजमालाप्रियकरी कंजरूपा च कंजजा ।।१८।।
कंज जातिः कंज गतिः कंज होम परायणा ।
कंजमंडल मध्यस्था कंजाभरण भूषिता ।।१९।।
कंजसन्मान निरता कंजोत्पत्ति परायण ।
कंजराशिः समाकारा कंजारण्य निवासिनी ।।२०।।
करंज वृक्ष मध्यस्था करंजवृक्ष वासिनी ।
करंज भलभूषढ़्या करंजारण्य वासिनी ।।२१।।
करंजमाला भरणा करवाल परायणा ।
करवाल प्रहृष्टात्मा करवालप्रियागतिः ।।२२।।
करवालप्रिया कन्था करवाल विहारिणी ।
करवालमयी कर्पाकरवाल प्रियंकरी ।।२३।।
कबन्धमाला भरणा कबन्ध राशिमध्यमा ।
कवन्धकूटसंस्थाना कबन्धानन्त भूषणा ।।२४।।
कबन्धनाद संतुष्टा कबन्धासन धारिणी ।
कबन्धगृह मध्यस्था कबन्धवन वासिनी ।।२५।।
कबन्थकांची करणी कबन्धराशिभूषणा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कबन्धमाला जयदा कबन्ध देह वासिनी ।।२६
कबन्धा सनमान्य च कपाल माल्य धारिणी ।
कपालमाला मध्यस्था कपाल व्रत तोषिता ।।२७
कपाल दीप संतुष्टा कपाल दीप रूपिणी ।
कपालदीपवरदाकपालकज्जलस्थिता ।।२८
कपालमालाजयदा कपालजय तोषिणी ।
कपालसिद्धि संहृष्टा कपाल भोजनोद्यता ।।२९
कपालव्रत संस्थाना कपालकमलालया ।
कवित्वामृतसाराच कवित्वामृतसागरा ।।३०
कवित्व सिद्धि संहृष्टा कवित्वादानकरिणी ।
कवि पूज्या कविगतिः कविरूपाकविप्रिया ।।३१
कवि ब्रह्मानन्दरूपा कवित्वव्रत तोषिता ।
कवि मानस संस्थाना कवि वाञ्छाप्रपूरिणी ।।३२
कवि कंठस्थिता कं कं कं कं कवि पूर्तिदा ।
कज्जला कज्जला दान मानसा कज्जलप्रिया ।।३३
कपालकज्जलसमा कज्जलेशप्रपूजिता ।
कज्जलार्णवमध्यस्था कज्जलानंद रूपिणी ।।३४
कज्जलप्रिय संतुष्टाकज्जलप्रियतोषिणी ।
कपालमालाभरणा कपालकरभूषणा ।।३५
कपालकरभूषाढ्या कपालचक्रमंडिता ।
कपालकोटि निलया कपालदुर्गकारिणी ।।३६
कपालगिरि संस्थाना कपालाचवासिनी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कापालपात्रसंतुष्टा कपालार्घ्य परायणा ।।३७
कपालार्घ्यप्रियप्राणा कपालार्घ्यवरप्रदा ।
कपालचक्ररूपा च कपालरूपमात्रगा ।।३८

कदलीकदली रूपा कदलीवन वासिनी ।
कदलीपुष्प संप्रीता कदलीफलमानसा ।।३९

कदलीहोम संतुष्टा कदलीदर्शनोद्यता ।
कदली गर्भमध्यस्था कदलीवनसुन्दरी ।।४०

कदंबपुष्पनिलया कदम्बवनमध्यगा ।
कदंबकुसुमामोदा कदंबबनतोषिणी ।।४१

कदंबपुष्पसंपूज्या कदंबपुष्पहोमदा ।
कदंब पुष्पमध्यस्था कदंब फल भोजिनी ।।४२

कदंबकाननान्तस्था कदंबाचल वासिनी ।
कक्षपा कक्षपाराध्या कक्षपासन सस्थिता ।।४३
कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवि ।
कल प्रीता कलहदा कलहा कलहातुर ।।४४
कर्णयक्षी कर्णवार्ता कथिनी कर्ण सुन्दरी ।
कर्ण पिशाचिनी कर्ण मंजरी कपिकच्छदा ।।४५
कविकक्षस्वरूपाढ्या कविकक्षस्वरूपिणी ।
कस्तूरी मृग संस्थानाकस्तूरी मृग मध्यगा ।।४६
कस्तूरी मृग सन्तोषा कस्तूरी मृग रूपिणी ।
कस्तूरी रस नीलांगीकस्तूरी गन्धतोषिता ।।४७
कस्तूरी पूजक प्राणा कस्तूरी पूजक प्रिया ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कस्तूरी प्रेम संतुष्टा कस्तूरी प्राण धारिणी ।।४८

कस्तूरी पूजकानंदा कस्तूरी गंधरूपिणी ।
कस्तूरी मालिकारूपा कस्तूरी भोजनप्रिया ।।४९

कस्तूरी तिलकानंदा कस्तूरी तिलकप्रिया ।
कस्तूरी होम संतुष्टा कस्तूरी तर्पणोद्यता ।।५०

कस्तूरी मार्जनोद्युक्ता कस्तूरी चक्रपूजिता ।
कस्तूरीष्प संपूज्या कस्तूरी चर्वणोद्यता ।।५१

कस्तूरी गर्भमध्यस्था कस्तूरी वस्त्रधारिणी ।
कस्तूरिका मोदरता कस्तूरी वन वासिनी ।।५२

कस्तूरी वन संरक्षा कस्तूरी प्रेम धारिणी ।
कस्तूरी शक्ति निलया कस्तूरी शक्ति कुंडगा ।।५३

कस्तूरी कुंड संस्नाता कस्तूरी कुंडमज्जना ।
कस्तूरी जीव संतुष्टा कस्तूरी जीव धारिणी ।।५४

कस्तूरी परमामोदा कस्तूरी जीवन क्षमा ।
कस्तूरी जातिभावस्था कस्तूरी गंध चुंबना ।।५५

कस्तूरी गंधसंशोभा विराजित कपाल भूः ।
कस्तूरी मदनान्तस्था कस्तूरी मद हर्षदा ।।५६

कस्तूरी कवितानाढ़्या कस्तूरी गृह मध्यगा ।
कस्तूरी स्पर्शक प्राणा कस्तूनी निंद कांतका ।।५७

कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता ।
कस्तूरीदाननिरता कस्तूरी वरदायिनी ।।५८

कस्तूरीस्थापना सक्ता कस्तूरी स्थान रंजिनी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कस्तूरी बन्दकाराध्या कस्तूरीस्थानवासिमी ।।५६
कस्तूरी कुशल प्रश्ना कस्तूरो स्तुतिवन्दिता ।
कहरुपा कहाढ्या च कहानन्दा कहात्मभूः ।।६०
कहपूज्या कहेत्याख्या कहहेया कहात्मिका ।
कहमाला कंठभूषा कहमन्त्र जपोद्यता ।।६१
कहनाम स्मृतिपरा कहनामपरायणा ।
कहपरायणरता कहदेवी कहेश्वरी ।।६२
कहहेतुः कहानन्दा कहनाद परायणा ।
कहमाता कहान्तस्था कह मन्त्रा कहेश्वरी ।।६३
कहगेया हाराध्या कह ध्यानपरायणा ।
कहतंत्राकहकहा कहचर्या परायणा ।।६४
कहाचारा कहगतिः कहतांडव कारिणी ।
कहारण्या कहगतिः कहशक्ति परायणा ।।६५
कहराज्यनता कर्म साक्षिणीकर्भ सुन्दरी ।
कर्म विद्या कर्म गतिः कर्मतंत्र परायणा ।।६६
कर्म मात्रा कर्म गात्रा कर्म धर्म परायणा ।
कर्म रेखा नाश कत्री कर्म रेखा विनोदिनी ।।६७
कर्म रेखा मोहकरी कर्म कीर्ति परायणा ।
कर्म विद्या कर्म सारा कर्मधारा च कर्म भूः ।।६८
कर्मकारी कर्महारी कर्म कौतुक सुन्दरी ।
कर्मकाली कर्मतारा कर्मछिन्ना च कर्मदा ।।६९
कर्म चाण्डालिनी कर्म वेदमाता च कर्म भूः ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कर्म काण्डरतानन्ता कर्मकाण्डानु मानिता ॥७०

कर्मकाण्डपरीणाहा कमठी कमठाकृतिः ।
कमठाराध्यहृदया कमठा कण्डसुन्दरी ॥७१

कमठासन संसेव्या कमठी कर्म तत्परा ।
करुणा करकान्ता च करुणाकर वन्दिता ॥७२

कठोराकरकान्ता कठोरकुचधारिणी ।
कपर्दिनी कपर्हिनी कठिनी कंकभूषणा ॥७३

करभोरुः कठिनदा करभा करभालया ।
कलभाषामयी कल्पाकल्पना कल्पदायिनी ॥७४

कमलस्था कलामाला कमलास्या क्वणत्प्रभा ।
ककुद्मिनी कष्टवत्ती करणीय कथार्चिताः ॥७५

कचार्चिता कचतनुः कच सुन्दर धारिणी ।
कठोर कुच संलग्ना कटिसूत्र विराजिता ॥७६

कर्णभक्षप्रिया कन्दा कथाकन्दगति कलिः ।
कलिनी कलिदूती च कविनायक पूजिता ॥७७

कर्णकक्षानियंत्री च कचित्कवि वरार्चिता ।
कर्त्री च कर्तृकाभूषा करिणी कर्ण शत्रूपा ॥७८

करणेशी करणपा कलवाचा कला निधिः ।
कलना कलनाकारा कलनाकारिकाकरा ॥७९

कलगेया कर्क राशि कर्कराशि प्रपूजिता ।
कन्या राशिः कन्यका च कन्यका प्रियभाषिणी ॥८०

कन्यादान संतुष्टा कन्यका दान तोषिणी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कन्यादान करानन्दा कन्यादान ग्रहेष्टदा ॥८१॥

कर्षणाकक्ष दहना कामिता कमलासन ।
करमालानन्दकर्त्री करमाला प्रपोषिता ॥८२॥

करमालाशयानन्दा करमाला समागमा ।
करमालासिद्धिदात्री करमाला करप्रिया ॥८३॥

करप्रिया कररता करदान परायणा ।
कलानन्दा कलिगतिः कलिपूज्या कलिप्रसूः ॥८४

कलनाद निनादस्था कलनाद वरप्रदा ।
कलनाद समाजस्था कहोला च कहोलदा ॥८५॥

कहोलगेहमध्यस्था कहोलवरदायिनी ।
कहोल कविताधार कहोलऋषिमानिता ॥८६॥
कहोलमानसाराध्या कहोलवाक्यकारिणी ।
कतृरूपा कतृमयी कतृमाता च कर्त्तरी ॥८७॥
कनीया कनकाराध्या कनीनकमयी तथा ।
कनीयानन्द निलया कनकानन्द तोषिता ॥८८॥
कनीनकराकाष्ठा कथार्णवकरी करी ।
करिगम्या करिगतिः करिध्वज परायणा ॥८९॥
करिनाथ प्रिया कंठा कथानक प्रतोषिता ।
कमनीया कमनका कमनीय विभूषणा ॥९०॥
कमनीय समाजस्था कमनीय व्रतप्रिया ।
कमनीय गुणाराध्या कपिलाकपिलेश्वरी ॥९१॥
कपिला राध्य हृदया कपिला प्रिय वादिनी ।
कह चक्रमन्त्र वर्णा कह चक्रप्रसूनका ॥९२॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

क ए ई ल ह्रीं स्वरूपा च क ए ई ल ह्रीं वरप्रदा ।
क ए ई ल ह्रीं सिद्धि दात्री क ए ई ल ह्रीं स्वरूपिणी ॥९३॥

क ए ई ल् ह्रीं मंत्रवर्णा क ए ई ल ह्रीं प्रसूकला ।
क वर्गा च कपाटस्था कपाटोद्‌घाटन क्षमा ॥९४॥

कंकाकाली च कपाली च कंकालप्रियभाषिणी ।
कंकाल भैरवाराध्या कंकालमानससंस्थिता ॥९५॥

कंकाल मोहनरताकंकालमोह दायिनी ।
कलुषघ्नी कलूषहा कलुषा तिविनाशिनी ॥९६॥

कलिपुष्पा कलादाना कशिपुः कश्यपार्चिता ।
कश्यपा कश्यपाराध्याकलिपूर्ण कलेवरा ॥९७॥

कलेवरकरी कांची कवर्गा च करालका ।
कराल भैरवाराध्या कराल भैरवेश्वरी ॥९८॥

कराला कलनाधारा कपर्दी च वरप्रदा ।
कपर्दीश प्रेमलता कपर्दी मालिकायुत्ता ॥९९॥

कपर्दिजपमालाढ्या करवीर प्रसूनदा ।
करवीर प्रियप्राणा करवीर प्रपूजिता ॥१००॥

कर्णिकार समाकारा कर्णिकार प्रपूजिता ।
करिषाग्निस्थिता कर्षमात्र सुवर्णदा ॥१०१॥

कलशा कलशाराध्या कषाया कषाया करिगानदा ।
कपिला कल कंठी च कलिकल्प लतामता ॥१०२॥
कल्पलता कल्पमाता कल्पकारी च कल्प भूः ।
कर्पूरामोदरुचिरा कर्पूरामोदधारिणी ॥१०३॥

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कर्पूर माला भरणा कर्पूरावास पूर्तिदा ।
कर्पूरमाला जयदा कर्पूरार्णवमध्यगा ।।१०४

कर्पूर तर्पणरताकटकाम्बरधारिणी ।
कपटेश्वर सम्पूज्या कपटेश्वर रूपिणी ।।१०५

कटु: कपिध्वजाराध्या कलाप पुष्पधारिणी ।
कलाप पुष्प रुचिरा कलाप पुष्प प्रपूजिता ।।१०६
क्रकचाक्रकचाराध्या कथं ब्रूमा करालता ।
कथंकार विनिर्मुक्ताकालीकालक्रियाक्रतुः ।।१०७

कलनी कामिनी पूज्या कामिनी पुष्पधारिणी ।
कामिनीपुष्प निलया कामिनी पुष्पपूर्णिमा ।।१०८

कामिनी पुष्पपूजार्हा कामिनी पुष्प भूषणा ।
कामिनी पुष्प तिलका कामिनी कुण्ड चुम्बना ।।१०९

कामिनी योग सन्तुष्टा कामिनी योग भोगदा ।
कामिनी कुण्ड संमाग्ना कामिनी कुंड मध्यग ।।११०

कामिनी मानसा राध्या कामिनी मान तोषिता ।
कामिनीमाना संचारा कालिकाकाल कालिका ।।१११

कामा च कामदेवी च कामेशी काम संभवा ।
कामभावा कामरता कामार्त्ता काममंडिता ।।११२
काममंजीर रणिता कामदेवप्रियान्तरा: ।
कामकाली कामकाला कालिका कमलार्चिता ।।११३
कादिका कमला काली कालानल समप्रभा ।
कल्पान्त दहना कान्ता कान्तार प्रिय वासिनी ।।११४

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कालपूज्या कालरता कालमाता च कालिनी ।
कालवीराकालघोराकालसिद्धा च कालदा ॥११५
कालांञ्जन समाकारा कालंजरनिवासिनी ।
काल ऋद्धिः काल वृद्धि कारागृह विमोचिनी ॥११६
कादि विद्या कादिमाता कादिस्था कादि सुन्दरी ।
काशी कांची च कांशीशा काशीशवरदायिनी ॥११७
क्रीं बीजा चैव क्रां बीजा हृदयाय नमः स्मृता ।
काम्याकाम्य गतिः काम्य सिद्धिदात्रीचकामभृत् ॥११८
कामाख्या कामरूपा च कामचाप विमोचिनी ।
कामदेव कला रामा कामदेवकलालया ॥११९
कालरात्रिः कामदात्री कान्तारा चकवासिनी ।
कालरूपाकालगतिः कालयोग परायण ॥१२०
काम संमर्दनरत्ता कामगेहविकाशनी ।
कामभैरवभार्या च काल भैरवकामिनी ॥१२१
कालभैरव योगस्था कालभैरव योगदा ।
कामधेनुः कामदोग्धी काममाता च कान्तिदा ॥१२२
कामुका कामुका राध्या कामुकानन्द बर्धिनी ।
कार्पवीर्या कार्तिकेया कार्तिकेय प्रपूजिता ॥१२३
कार्याकारणदाकार्य कारिणीकारणान्तरा ।
कान्ति गम्या कान्तिमय कात्यायनी चका ॥१२४
काम सारा च काश्मीरा काश्मीरा चारतत्परा ।
कामरूपा चाररता कामरूपप्रियवदा ॥१२५

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कामरूपा चारसिद्धिः कामरूपमनोमयी ।
कार्तिकी कार्तिकाराध्याकांचनारप्रसून भूः ॥१२६
कांचनार प्रसूनाभा कांचनार प्रपूजिता ।
कांचरूपा कांचभूमिः कांस्य पात्रप्रयोजिनी ॥१२७
कांस्यध्वनिमयी काम सुन्दरी काम चुम्बना ।
कांस पुष्प प्रतीकाशा कामद्रुम समागमा ॥१२८
काम पुष्पा कामभूमिः काम पूज्या च कामदा ।
कामदेहा कामगेहा कामबीजपरायणा ॥१२९
कामध्वज समारूढ़ा कामध्वज समास्थिता ।
काश्यपी काश्यपाराध्या काश्यपानन्द दायिनी ॥१३०
कालिन्दी जलसंकाशा कालिन्दी जलपूजिता ।
कादेवपूजा निरत्ता कामदेव परमार्थिदा ॥१३१
कार्मणा कर्मणाकारा कामकार्मण कारिणी ।
कार्मण त्रोटनकरी, काकिनी कारणाह्वया ॥१३२
काव्यामृता च कालिंगा कालिंज मर्दनोद्धता ।
काला गुरू विभूषाढ्या कालागुरु विभूषिता ॥१३३
कालाला सुगन्धा च काला गुरु प्रतर्पणा ।
कावेरी नीर संप्रीता काबेरी नीरवासिनी ॥१३४
कालचन्द्र प्रभाकारा काल चक्र निबासिनी ।
कानना काननाधारा कारुः कारुणि कामिनी ॥१३५
काम्पिल्य वासिनी काष्ठा काम पत्नी च काम भूः ।
कादम्बीरा पानरता तथा कादम्बरी कला ॥१३६

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कामबन्ध्या च कामेशी कामराज प्रपूजिता ।
कामराजेश्वरी विद्या कामकौतुक सुन्दरी ॥१३७
कांबोजजाकाञ्छिनदा कांस्य कांचन कारिणी ।
काननाद्रि समाकारा कांचनाद्रि प्रदा नदा ॥१३८
कामकीर्तिः कामकेशी कारिका कान्तराश्रया ।
कामभेदी च कामार्तिः नाशिनी कामभूमिका ॥१३९
काल निर्णाशिनी काव्य वनिता काम रूपिणी ।
कायस्था काम संदीप्तिः काव्यदा काल सुन्दरी ॥१४०
कामेशी कारण वरा कामेशी पूजनोद्यता ।
कांचीनूपुरभूषाढ्या कुंकमा भरणान्विता ॥१४१
कालचक्रा कालगतिः कालचन्द्र मनोभुवा ।
कुंदमध्या कुंद पुष्पा कुंद पुष्पप्रिया कुजा ॥१४२
कुजमाता कुजाराध्या कुठार वरधारिणी ।
कुंजरस्था कुशरत्ता कुशेशय विलोचना ॥१४३
कुनटी कुररी कुद्रा कुरंगी कुटजाश्रया ।
कुंभीनस विभूषा च कुंभीनस बधोद्यता ॥१४४
कुंभकर्ण मनोल्लासाकुल चूडामणिः कला ।
कुलाल गृह कन्या च कुलचूडामणिः प्रिया ॥१४५
कुलपूज्या कुलाराध्या कुल पूजा परायणा ।
कुलभूषा तथा कक्षिः कुररी गण सेविता ॥१४६
कुलपुष्पा कुलरता कुल परायणा ।
कुलवस्या कुलाराध्या कुल कुन्ड समप्रभा ॥१४७

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कुल कुंड समोल्लासा कुंड पुष्पपरायणा ।
कुंड पुष्प प्रसन्नास्या कुंड गोलोद्भवात्मिका ॥१४८
कुंड गोलद्भवाधरा कुंड गोल मयी कुहुः ।
कुंड गोलप्रिया प्राणा कुंड गोल प्रपूजिता ॥१४९
कुंड गोलमनोल्लासा कुंड गोल बलप्रदा ।
कुंड देवरता क्रुद्धा कुलसिद्धि करापरा ॥१५०
कुंडसिद्धिः कुंड ऋद्धिः कुमारीपूजनोद्यता ।
कुलकुंड समाकारा कुल कुंड समान भूः ॥१५१
कुमारीपूजक प्राणा कुमारी पूजकालया ।
कुमारी काम संतुष्टा कुमारी पूजनोत्सुका ॥१५२
कुमारी व्रत संतुष्टा कुमारी रूपधारिणी ।
कुमारी भोजनप्रीता कुमारी च कुमारदा ॥१५३
कुमारी माता कुलदा कुलयोनिः कुलेश्वरी ।
कुललिंगा कुलानन्दा कुलरम्या कुमर्कधृक् ॥१५४
कुन्ती च कुलकान्ता च कुलमार्गपरायणा ।
कुल्ला च कुरुकुल्ला च कुल्लुका कुलकामदा ॥१५५
कुलिशाङ्गी कुब्जिका च कुब्जिकानन्दवर्धिनी ।
कुलीना कुंजर गतिः कुंजरेश्वर गामिनी ॥१५६
कुलपाली कुलवत्ती तथैव कुलदीपिका ।
कुलयोगेश्वरी कुडा कुकुमारुणविग्रहाम् ॥१५७
कुंकुमानन्द सन्तोषा कुंकुमार्णव वासिनी ।
कुसुमाकुसुमप्रीता कुलभूः कुलसुन्दरी ॥१५८

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कुमुद्वती कुमुदिनी कुशला कुलटालया ।
कुलटालयमध्यस्था कुलटा संगतोषिता ॥१५९
कुलटाभवनोद्युक्ता कुशावर्ता कुलार्णवा ।
कुलार्णवाचाररता कुण्डली कुण्डला कृतिः ॥१६०
कुशलाकृति रूपा च कूर्चबीज धरा चकः ।
कुं कुं कुं कुं शब्दरता क्रुं क्रुं क्रुं क्रुं परायण ॥१६१
कुमती च कुलश्रेष्ठा कुल श्रेष्ठाकुलचक्र परायण ।
कूटस्था कुटदृष्टिश्च कुन्तला कुन्तलाकृतिः ॥१६२
कुं कुं कुं कुं शब्द निलयाकुक्कुरालय वासिनी ।
कुक्कुरा संग संयुक्ता कुक्कुरानन्त विग्रहा ॥१६३
कूर्चा रंभा कूर्चबीजा कूर्च जाप परायण ।
कुच स्पर्शन संतुष्टा कुचालिंगनहर्षदा ॥१६४
कुगतिघ्नी कुबेरार्च्चा कुचभूः कुलसुन्दरी ।
कुगायना कुचधरा कुमाता कुन्द दन्तिनी ॥१६५
कुगेया कुहराभासा कुगेया कुघ्नदारिका ।
कीर्तिःकिरातिनी क्लिन्नाकिन्नेरीकिन्नरीप्रिया ॥१६६
क्रींकारा क्रीं जपासक्ता क्रीं हूँ स्त्रींमंत्र रुपिणी ।
किर्मीरित्त दृशपांगीकिशोरी च किरीटिनी ॥१६७
कीटभाषा कीटयोनिः कीटमाता च कीटदा ।
किंशुका कीरभाषा च क्रियासारा क्रियावती ॥१६८
कीं कीं शब्दपरा क्लीं क्लूं क्लैं क्लौं मंत्र रुपिणी ।
कांकींकूं कैं स्वरुपाचकः फट् स्वाहा स्वरुपिणी ॥१६९

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

केतकीभूषणानन्दकेतकी भरणान्विता ।
कैकदा केशनी केशी केशी सूदन तत्परा ॥१७०
कोटयनन्तसंत्र युता केरूपा केरलाश्रया ।
केरलाचार निपुणा केरलेन्द्र गृहस्थिता ॥१७१
केदाराश्रय संस्था च केदारेश्वर पूजिता ।
क्रोधरूपा क्रोधपदा क्रोधमाता च कौशिकी ॥१७२
कोदण्डधारिणी क्रौंच कौशिल्या कौलमार्गगा ।
कौलिनीकौलिकाराध्या कौलिकागार बासिनी ॥१७३
कौतुकि कौमदी कौला कुमारी कौरकार्चिता ।
कौण्डिया कौशिकी क्रोधाज्वालाभासुरूपिणी ॥१७४
कोटिकालानलज्वाला कोटिमार्तण्ड बिग्रहा ।
क्रीं क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं फट् स्वाहा मंत्ररूपणि ॥१७५

इति श्री दक्षिणकालिकाताः सर्व साम्राज्य मेधा-दायक सहस्त्रनाम स्तोत्रं सम्पूर्णम् ॥

❀❀❀

ककारादि काली सहस्त्रनाम स्तोत्र का पाठ करने के उपरान्त साधक को महाकाली सहस्त्रनाम स्तोत्र का पाठ करना चाहिये ।

१- कालीकासहस्त्रनाम स्तोत्र ।
२- ककारादि कालीसहस्त्रनाम ।
३- महालीसहस्त्रनामस्तोत्र ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

इन तीनों सहस्त्रनामों द्वारा साधक जगत् कल्याण के लिए अनेकों प्रकार के टरे, टोटके; जादू टोनों का प्रयोग करते हैं।

श्रीराम द्वारा काली सहस्त्रनाम से जानकी की स्तुति करना।

महाकालीसहस्रनामस्तोत्र

ब्रह्मणो वचनं श्रुत्वारामः कमलोचनः।
प्रोन्मील्य शनकै रक्षि वेपमानो महाभुजः ॥१
प्रणम्य शिरसा भूमौ तेजसा चापि विह्वलः।
भीतः कृताञ्जालिपुटः प्रोवाचपरमेश्वरीम् ॥२

रामउवाच

का त्वं देवि विशालाक्षि शशां वयवाकिते।
न जाने त्वां महादेवि यथावद्ब्रूहि पृच्छते ॥३
रामस्य वचनं श्रुत्वा ततः सा परमेश्वरी।
व्याजहार रघुव्याघ्रं योगिनामभयप्रदा ॥४

परमेश वरीउवाच

माँ विद्धि परमां शक्तिं महेश्वरसमाश्रयाम्।
अनन्यामन्यामेकां यांपश्यन्तिमुमुक्षवः ॥५
अहं वै सर्वभावानामात्मा सर्वान्तरा शिवाः।
शाश्वती सर्वविज्ञाना सर्वमूर्तिप्रर्वातिका ॥६
अनन्तानन्तमहिमा ससाराणंवतारिणी।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

दिव्यददामि ते चक्षुः पश्यमेपदमैश्वरम् ॥७
इत्युक्त्वाविररामैया रामोऽपश्यच्च तत्पदम ।
कोटिसूर्यप्रतीकाशं विश्वक्तेजो निराकुलम् ॥८
ज्वालावलीसहस्त्राढ्यं कालानलशतोपमम्
दंष्ट्राकरालं दुर्धर्षं जयमण्डलमण्डितम् ॥९
त्रिशूलवरहस्तं च घोर रुपं भयावहम् ।
प्रशान्यत्सौम्यवदनन्मनभश्वैर्यसंयुतम ॥१०
चन्द्रावयवलक्ष्माढ्यं चन्द्रकोटिसमप्रभम् ।
किरीटिनंगदाहस्तं नूपुरैरुपशोभितम् ॥११
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
शङ्खचक्रकरंकाव्यं त्रिनेत्रं कृत्तिवाससम् ॥१२
अन्तः स्थ चाण्डवाह्यस्थं वाह्यरभ्यन्तरतः परम ।
सर्वशक्तिमयं शान्तं सर्वाकारं सनातनम् ॥१३
ब्रह्मेन्द्रोपेन्द्रयोगीन्द्रैरीडयमानपदाम्बुजम् ।
सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् ॥१४
सर्वमावृत्य तिष्ठन्तं ददर्श पदमैश्वरम् ।
दृष्टवा च तादृशं रूपंदिव्य माहेश्वरम् पदम् ॥१५
तथैव च समाविष्टः स रामोहृतमानसः ।
आत्मन्याधाय चात्मानमोङ्कारं समनुस्मरन् ॥१६
नाम्नामष्टसहस्त्रेण तुष्टाव परमेश्वरीम् ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

श्रीमहाकालीसहस्रनाम स्तोत्र प्रारम्भ

रामउवाच

ॐ-सीतोमापरमा शक्तिनन्तानिष्कलामला ॥१७॥
शान्ता माहेश्वरीनित्या शाश्वती १० परमाक्षरा ।
अचिन्त्याकेवला नन्ता परमात्मिका ॥१८॥
अनादिरव्ययाशुद्धादेवात्मा २० सर्वगोचरा ।
एकानेकविभागस्था मायातीता सुनिर्मला ॥१९॥
महामाहेश्वरी शक्ता महादेवीनिरञ्जना ।
काष्ठा ३० सर्वान्तरस्था च चिच्छक्तिरतिलालसा ॥२०॥
जानकी मिथिलानन्दा राक्षसान्तविधायिनी ।
रावणान्तकरी रम्या रामवक्षःस्थलालया ॥२१॥
उमा सर्वात्मिका ४० विद्या ज्योतिरूपायुताक्षरी ।
शान्तिः प्रतिष्ठा सर्वे । निवृत्तिरमृतपदा ॥२२॥
व्योममूर्तिर्व्योममयी व्योमधारा ५० ऽच्युतालता ।
अनादिनिधना योषा कारणात्मा कला कला ॥२३॥
नन्दप्रथमजा नाभिरमृतस्यान्तसंश्रया ।
प्राणेश्वरप्रिया ६० मातामही महिषवाहना ॥२४॥
प्राणेश्वरी प्राणरूपा प्रधानपुरुषेश्वरी ।
सर्वशक्तिः कला काष्ठा ज्योत्स्नेन्दो ७०र्महिमास्पदा ॥२५॥
सर्वकार्यनियन्त्री च सर्वभूतेश्वरेश्वरी ।
अनादिरव्यक्तगुणा महानन्दा सनातनी ॥२६॥
आकाशयोनि योगस्था सर्वयोगेश्वरेश्वरी ८० ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

शवासना चितान्तस्था महेशी बृषवाहना ॥२७॥
बालिकातरुणी बृद्धा बृद्धमाता जरातुरा।

महामाया ९० सुदुष्पूरामूलप्रकृतिरीश्वरी ॥२८॥
संसारयोनिः सकला सर्वशक्तिसमुद्भवा।

संसार सारा दुर्वारा दुर्निरीक्ष्यादुरासदा १०० ॥२९॥
प्राणशक्तिः प्राणबिद्यायोगिनीपरमा कला।

महाविभूतिर्दुर्घर्षा मूलप्रकृतिसम्भवा ॥३०॥
अनाद्यनन्तविभवा परात्मा पुरुषो बली ११० ।

सर्गस्थित्यन्तकरणी सुदुर्वाच्यादुरत्यया ॥३१॥
शब्दयोनिश्शब्दमयी नादाख्या नाद विग्रहा।

प्रधानपुरुषातीता प्रधानपुरुषात्मिका ॥३२॥
पुराणी १२० चिन्मयी पुंसामादिः पुरुषरूपिणी।

भूतान्तरात्मा कूटस्था महापुरुषसंज्ञिता ॥३३॥
जन्म मृत्युजरातीता सर्व शक्तिसमन्विता।

व्यापिनी चानवच्छिन्ना १३० प्रधाना सुप्रवेशिनी ॥३४॥
क्षेत्रज्ञा शक्तिरव्यक्तलक्षणामलवर्जिता ।

अनादिमायासम्भिभान्नितचाप्रकृतिर्गुणः १४० ॥३५॥
महामाया समुत्पभातामसीपौरुषं ध्रुवा।

व्यक्ताव्यक्तात्मिकाकृष्णा रक्तशुक्लाप्रसूतिका ॥३६॥
स्वकार्या १५० कार्यजननी ब्रह्मास्या ब्रह्मसंश्रया।

व्यक्ता प्रथमजा ब्राह्मीमहती ज्ञानरूपिणी ॥३७॥
वैराग्यैश्वर्यधर्मात्मा ब्रह्ममूर्ति १६० हृदिस्थिता।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

जयदा जित्वरीजैत्री जय श्रीर्जयशालिनी ॥३८॥
सुखदा शुभदा सत्या शुभा १७० संक्षोभकारिणी।
अपो योनिः स्वयम्भूतिमानिसी तत्वसम्भवा ॥३९॥
ईश्वराणी च सर्वाणी शंकरार्द्धशरीरणी।
भवानी चैव रूद्राणी १८० महालक्ष्मीरथाम्बिका ॥४०॥
माहेश्वरी समुत्पन्ना भुक्तिमुक्तिफलप्रदा।
सर्वेश्वरी सर्ववर्णा नित्या मुदितमानसा ॥४१॥
ब्रह्मेन्द्रोपेन्द्रनमिता शंकरेच्छानुवर्तिनी १९०।
ईश्वरार्द्धासनगता रघूत्तमपतिव्रता ॥४२॥
सकृद्विभाविता सर्वा समुद्र परिशोषिणी।
पार्वतीहिमवत्पुत्री परमानन्ददायिनी ॥४३॥
गुणाढ्या योगदा २०० योग्या ज्ञानमूर्तिविकाशिनी।
सावित्रीकमला लक्ष्मीश्रीरनन्तोरसि स्थिता ॥४४॥
सरोजनिलया शुभ्रा योगनिद्रा २१० सुदर्शना।
सरस्वती सर्वविद्या जगज्ज्येष्ठा सुमंगला ॥४५॥
वासवी वरदा वाच्या कीर्तिः सर्वार्थसाधिका २२०।

वागीश्वरी सर्वविद्या महाविद्या सुशोभना ॥४६॥
गुह्यविद्यात्मविद्या च सर्वविद्यात्मभाविता।

स्वाहाविश्वम्भरी २३० सिद्धिः स्वधा मेधा धृतिः श्रुतिः ॥४७॥
नाभिःसुनाभिः सुकृतिर्माधवी नरवाहिनी २४०।

पूजा विभावरी सौम्या भगिनी भोगदायिनी ॥४८॥
शोभा वशंकरी लीलामानिनीपरमेष्ठिनी २५०।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

त्रैलोक्यसुन्दरी रम्या सुन्दरीकामचारिणी ॥४९॥
महानुभावमध्यस्थामहामहिषमर्दिनी ।
पद्ममालापापहराविचित्रमुकुटानना ॥५०॥
कान्ता २६० चित्राम्बरधरादिव्यभरणभूषिता ।
हंसाख्या व्योमनिलया जगत्सृष्टिविवर्द्धिनी ॥५१॥
निर्यन्त्रा मन्त्रवाहस्था नन्दिनीभद्रकालिका ।
आदित्यवर्णा २७० कौमारी मयूरवरवाहिनी ॥५२
वृषासनगता गौरी महाकाली सुरार्चिता ।
अदितिर्नियता रौद्रीपद्मगर्भा २८० विवाहना ॥५३॥
विरूपाक्षी लेलिहाना महासुरविनाशिनी ।
महाफलानवद्यांगीकामपूराविभावरी ॥५४॥
विचित्ररत्नमुकुटाप्रणतर्ध्दिविवर्दिनी २९० ।
कौशिकी कर्षणीरात्रिस्त्रिदशार्त्तिविनाशिनी ॥५५॥
विरूपा च सुरूपा च भीमा मोक्षप्रदायिनी ।
भक्तार्तिनाशनीभव्या ३०० भवभावविनाशिनी ॥५६॥
निर्गुणा नित्यविभवा निःसारानिरपत्रपा ।
यशस्विनीसामगीतिर्भवांगनिलयालया ॥५७॥
दीक्षा ३१० विद्याधरी दीप्ता महेन्द्रविनिपातिनी ।
सर्वातिशायिनी विद्या सर्वशक्तिप्रदायिनी ॥५८॥
सर्वेश्वरप्रिया तार्क्षी समुद्रान्तरवासिनी ।
अकलङ्का निराधारा ३२० नित्यसिद्धा निरामया ॥५९॥
कामधेनुर्वेदगर्भा धीमत्री मोहनाशिनी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

निः संकत्वा निरातंका विनयाविनयप्रदा ३२० ॥६०॥
ज्वाखामालासहस्राढ्यादेवदेवी सन्मोन्मनी ।
उर्वी गुर्वी गुरुः श्रेष्ठा सगुणा षढ्गुणात्मिका ॥६१॥
महाभगवती ३४० भव्या वसुदेवसमुद्भवा ।
महेन्द्रोपेन्द्रभगिनी भक्ति गम्यपरायणा ॥६२॥
ज्ञानज्ञेया जरातीतावेदान्तविषया गतिः ।
दक्षिणा ३५० दहना बाह्या सर्वभूदनमस्कृता ॥६३॥
योगमाया विभावज्ञामहामोहामहोयसी ।
सत्यासर्वसमुन्द्भूतिर्ब्रह्मवृक्षाश्रया ३६० मतिः ॥६४॥
वीजांकुरसमुन्द्रूतिर्महाशक्ति र्महामतिः ।
ख्यातिः प्रतिज्ञा चित्सविन्महायोगेन्द्रशायिनी ॥६५॥
विकृतिः ३७० शङ्करी शास्त्री गन्धर्वा यक्षसेविता ।
वैश्वानरीमहाशालादेवसेना गुहप्रिया ॥६६॥
महारात्री शिवानन्दा शची ३८० दुःस्वप्ननाशिनी ।
पूज्याऽपूज्या जगद्धात्रीदुर्विज्ञेयस्वरूपिणी ॥६७॥
गुहाम्बिका गुहोत्पतिर्महापीठा मरुत्सुता ।
हव्यवाहान्तरा ३९० मार्गीहव्यवाहसमुद्भवा ॥६८॥
जगद्योनिर्जगन्माता जगन्मृत्युर्जरातिगा ।
बुद्धिर्माता बुद्धिमती पुरुषान्तरवासिनी ४०० ॥६९॥
तपस्विनी समाधिस्था त्रिनेत्रा दिविसंस्थिता ।
सर्वेन्दियमनोमाता सर्वभूतहृदिस्थिता ॥७०॥
संसारतारिणी विद्या ब्रह्मवादिमनोलया ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

ब्रह्माणी वृहती ४१० ब्राह्मीब्रह्मभूता भयाविन: ।।७१।।
हिरण्यमयी महारात्रिः संसारपरिवर्तिका ।
सुमालिनी सुरूपा च तारिणी भाविनी ४२० प्रभा ।।७२।।
उन्मीलनी सर्वसहासर्वप्रत्ययपसाक्षिणी ।
तपिनी तापिनीविश्वा भोगदा धारिणी धरा ४३० ।।७३।।
सुसौम्या चन्द्रवदना ताण्डवासक्त मानसा ।
सत्वशुद्धिकरी शुद्धिर्मलत्रयविनाशिनी ।।७४।।
जगत्प्रिया जगन्मूर्ति स्त्रिमूर्तिरमृताश्रया ४४० ।
निराश्रया निराहारानिरंकुशरणोद्भवा ।।७५।।
चक्रहस्ता विचित्रांगी स्त्रग्विणी पद्मधारिणी ।
परापरविधानज्ञा महापुरुपूर्वजा ।।७६।।
विद्येश्वरप्रिया ४५० ऽविद्या विद्युज्जिह्व जितश्रमा ।
विद्यामयीसहस्त्राक्षी सहस्त्रश्रवणात्मजा ।।७७।।
सहस्त्ररश्मिपद्मस्था महेश्वरपदाश्रया ।
ज्वालिनि ४६० सद्मना व्याप्ता तैजसी पद्मरोधिका ।।७८।।
महादेवाश्रया मान्या महादेव मनोरमा ।
व्योमलक्ष्मीः सिंहरथा के चितान्यमितप्रभा ४७० ।।७९।।
विश्वेश्वरी विमानस्थाविशोका शोकनाशिनी ।
अनाहता कुण्डलिनी नलिनी पद्मवासिनी ।।८०।।
शतानन्दा सतां कीर्तिः ४८० सर्वभूताशयस्थिता ।
वाग्देवता ब्रह्मकला कलातीताकलावती ।।८१।।
ब्रह्मर्षिब्रह्महृदया ब्रह्म विष्णुशिवप्रिया ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

व्योमशक्तिः क्रियाशक्ति ४६० जैनशक्तिः परागतिः ।८२
क्षोभिकारौद्रिकाभेद्याभेदाभेदविवर्जिता ।

अभिन्ना भिन्नसंस्थाना बंशिनी बंशहारिणी ४०० ।८३।
गुह्याशक्तिगुणातीता सर्वदा सर्वतोमुखी ।

भगिनी भगवत्पत्नी सकला कालकारिणी ।।८४।।
सर्ववित्सर्वतोभद्रा ५१० गुह्यातीता गुहावलिः ।

प्रक्रिया योगमाता च गन्धा विश्वेश्वरेश्वरी ।८५।
कपिला कपिलाकान्ता कनकाभा कलान्तरा ५२० ।

पुण्या पुष्करिणी भोक्त्री पुरन्दरपुरः सरा ।८६।
पोषिणी परमैश्वर्यभूतिता भूतिभूषणा ।

पञ्चब्रह्मसमुत्पत्तिः परमात्मात्मविग्रहा ।८७।
नर्मोदया ५३० भानुमती योगिज्ञेया मनोजवा ।

वीजरूपा रजोरूपा वंशिनी योगरूपिणी ।८८।
सुमन्त्रामन्त्रिणी पूर्णा ५४० ह्लादिनी क्लेशनाशिनी ।

मनोहरिर्मनोरक्षी तापसी वेदरूपिणी ।८९।
वेदशक्ति र्वेदमाता वेदविद्या प्रकाशिनी ।

योगेश्वरेश्वरी ५५० मालामहाशक्तिर्मनोमयी ।९०।
विश्वावस्था वीरमुक्ति र्विद्युन्माला विहायसी ।

पीवरी सुरभी वन्द्या ५६० नन्दिनी नन्दवल्लभा ।९१।
भारती परमानन्दा परापरविभेदिका ।

सर्वं प्रहरणोपेता काम्या कामेश्वरेश्वरी ।९२।
अचिन्त्याऽचिन्त्यमहिमा ५७० दुर्लेखा कनकप्रभा ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

कूष्माण्डी धनरत्नाढ्या सुगन्धा गन्धदायिनी ॥९३॥
त्रिविक्रमपदोद्भूता धनुष्पाणिः शिरोहया ।
सुदुर्लभा ५८० धनाध्यक्षा धन्या पिंगलोचना ॥९४॥
भ्रान्तिः प्रभावती दीप्तिः पंकजायतलोचना ।
आद्या हृत्कमलोद्भूता परामाता ५९० रणप्रिया ॥९५॥
सत्क्रिया गिरिजा नित्यशुद्धापुष्पनिरन्तरा ।
दुर्गा कात्यायनी चण्डी चर्चिका शान्तविग्रहा ६०० ॥९६॥
हिरण्यवर्णा रजनी जगन्मन्त्रप्रवर्तिका ।
मन्दराद्रिनिवासा च शारदा स्वर्णमालिनी ॥९७॥
रत्नमाला रत्नगर्भा पृथ्वी विश्वप्रमादिनी ६१० ।
पद्मासना पद्मनिभा नित्यतुष्टाऽमृतोद्भवा ॥९८॥
धुन्वती दुष्प्रकम्पा च सूर्यमातारषदूती ।
महेन्द्रभगिनी माया ६२० वरेण्यावरदर्पिता ॥९९॥
कल्याणी कमला रामापञ्चभूतवरप्रदा ।
वाच्या वरेश्वरी नन्द्या दुर्जया ६३० दुरतिक्रमा ॥१००॥
कालरात्रिर्महावेगा वीरभद्रहितप्रिया ।
भद्रकाली जगन्माता भक्तानां भद्रदायिनी ॥१०१॥
करालापिंगलाकारा नामवेदा ६४० महानदा ।
तपस्विनी यशोदा च यथाध्वपरिवर्तिनी ॥१०२॥
शङ्खिनी पद्मिनी सांख्या सांख्ययोगप्रवर्तिका ।
चैत्रीसंवत्सरा ६५० रुद्रा जगत्सम्पूरणीन्द्रजा ॥१०३॥
शुम्भारिः खेचरी खस्था कम्बुग्रीवा कलिप्रिया ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

खरध्वजा खरारूढा ६६० परर्घ्यापरमालिनी ॥१०४॥
ऐश्वर्यरत्ननिलया विरक्ता गरुडासना ।

जयन्ती हृद्गुहारम्या सत्ववेगा गणाग्रणीः ॥१०५॥
सङ्कल्पसिद्धा ६७० साम्यस्था सर्वविज्ञानदायिनी ।

कलिकल्मषहन्त्री च गुह्योपनिषदुत्तमा ॥१०६॥
नित्यदृष्टिः स्मृतिर्व्याप्तिः पुष्टिस्तुष्टि ६८० क्रियावती ।

विश्वामरेश्वरेशाना भुक्तिर्मुक्तिः शिवामृता ॥१०७॥
लोहिता सर्वयाता च भीषणा वनमालिनी ६९० ।

अनन्तशयनाऽनाद्या नरनारायणोद्भवा ॥१०८॥
नृसिंही दैत्यमथिनी शङ्खचक्रगदाधरा ।
सङ्कर्षणसमुत्पत्तिरम्बिजात संश्रया ॥१०९॥

महाज्वाला महामूर्तिः ७०० सुमूर्तिः सर्वकामधुक् ।
सुप्रभा सुतरांगौरी धर्मकामार्थमोक्षदा ॥११०॥
भ्रूमध्यनिलयाऽपूर्वा प्रधानपुरुषा बली ।
महाविभूतिदा ७१० मध्या सरोज नयनासना ॥१११॥
अष्टादशभुजा नाट्या नीलोत्पलदलप्रभा ।

सर्वशक्त्या समारूढा सर्वधर्मा धर्मानुवर्जिता ॥११२॥
वैराग्यज्ञान निरता निरातालोका ७२० निरिन्द्रिया ।

विचित्रगहना धीरा शाश्वतस्थानवासिनी ॥११३॥
स्थानेश्वरी निरानन्दा त्रिशूलवर धारिणी ।

अशेष देवतामूर्तिदेवतापरदेवता ७३० ॥११४॥
गणात्मिका गिरेः पुत्री निशुम्भविनिपातिनी ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

अवर्णां वर्णरहितानिर्वर्णां बीजसम्भवा ।।११५।।
अनन्त वर्णाऽनन्यस्था शंकरी ७४० शान्तमानसा ।

अगोत्रा गोमती गोप्त्री गुह्यरूपा गुणान्तरा ।।११६।।
गोश्रीर्गव्यप्रिया गौरी गणेश्वरनमस्कृता ।

सत्यमात्रा ७५० सत्यसन्धा त्रिसन्ध्या सन्धिवर्जिता ।।११७।।
सर्ववादाश्रया सांख्या सांख्ययोगसमुद्भवा ।

असख्येयाऽप्रमेयाख्या शून्या शुद्धकुलोद्भवा ७६० ।।११८।।
बिन्दुनादसमुत्पत्तिः शम्भुवामा शशिप्रभा ।

बिसंगा भेदरहिता मनोज्ञा मधुसूदनी ।।११९।।
महाश्रीः श्रीसमुत्पत्ति ७७० स्तमः पारेप्रतिष्ठिता ।

त्रितत्वमाता त्रिविधा सुसूक्ष्मपद संश्रया ।।१२०।।
शान्त्यतीता मलातीता निर्विकारा निराश्रया ।

शिवाख्या चित्रनिलया ७८० शिवज्ञानस्वरूपिणी ।।१२१।।
दैत्यदानवनिर्मात्री काश्यपी कालकर्णिका ।

शास्त्रयोनिः क्रियामूर्तिश्चतुर्वर्गप्रदर्शिका ।।१२२।।
नारायणी नवोत्भूता कौमुदी ७९०लिङ्गधारिणी ।

कामुकी ललिता तारा परापरविभूतिदा ।।१२३।।
परान्तजातमहिमा वडवा वामलोचना ।

सुभद्रा देवकी ८०० सीता वेदवेदांगपारगा ।।१२४।।
मनस्विनीमन्युमाता महामन्युसमुद्भवा ।

अमृत्युरमृताअमृत्यमृता स्वादापुरुहूता पुरुप्लुता ।।१२५।।
अशोच्या ८१० भिन्नविषया हिरण्यरजतप्रिया ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

हिरण्या राजती हैमो हेमाभरण भूषिता ॥१२६॥
विभ्राजमाना दुर्ज्ञेया ज्योतिष्टोमफलप्रदा ।
महानिद्रा ८२० समुद्भूतिर्बलीन्द्रासत्यदेवता ॥१२७॥
दीर्घांकुद्मिनी विद्या शान्तिदा शान्तिवर्द्धिनी ।
लक्ष्मय दिशक्तिजननी शक्तियक्रप्रवर्तिका ॥१२८॥
त्रिशक्ति जननी ८३० जन्या षडूर्मिपरिवर्जिता ।
स्वाहा च कर्मकरणीयुगान्तदलनात्मिका ॥१२९॥
सङ्कर्षणा जगद्धात्री कामयोनिः किरीटिनी ।
ऐन्द्री ८४० त्रैलोक्यनमिता वैष्णवीपरमेश्वरी ॥१३०॥
प्रद्युम्नदयिता दान्ता युग्मदृष्टिस्त्रिलोचना ।
महोत्कटाः हंसगतिः प्रचण्डा ८४० चण्डविक्रमा ॥१३१॥
बृषागिरिशा वियन्मात्रा विन्ध्यपर्वतवासिनी ।
हिमवन्मेरुनिलया कैलासगिरिवासिनी ॥१३२॥
चाणूरहन्त्री धनया नीतिज्ञा कामरूपिणी ।
वेदविद्या व्रतरता धर्मशीलाऽखिलाशना ॥१३३॥
अयोध्यानिलया वीरा महाकालसमुद्भवा ।
विद्याधरक्रित्या सिद्धा विद्याधरनिराकृतिः ॥१३४॥
आप्यायन्ती ८७० वहन्ती च पावदी पोषणी खिला ।
मातृजा मन्मथोद्भुता वारिजा वाहनप्रिया ॥१३५॥
करीषिनी स्वधा वाणी ८८० वीणावादनतत्परा ।
सेविता सेविका सेवा सिनीवाली गरुत्मती ॥१३६॥
अरुन्धती हिरण्याक्षी मणिदा श्रीवसुप्रदा ८४० ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

वसुमती वसोधाँरा वसुधातः समुद्भवा ॥१३७॥
वरारोहा वरार्हा च वपुः संगसमुद्भवा ।
श्रीफली श्रीमती श्रीशा श्रीनिवासा ९०० हरिप्रिया ॥१३८॥
श्रीधरी श्रीकरी कम्पा श्रीधरा ईशवीरणी ।
अनन्तदृष्टिरक्षुद्रा धात्रीशा धनदप्रिया ९१० ॥१३९॥
निहन्त्री दैत्यसिंहानां सिंहिका सिंहवाहिनी ।
सुसेना चन्द्रनिलया सुकीर्तिश्छिन्नसंशया ॥१४०॥
बलज्ञा बलदा बामा ९२० लेलिहानाऽमृतास्रवा ।
नित्योदिता स्वयंज्योतिरुत्सुकामृतजीवनी ॥१४१॥
वज्रदंष्ट्रा वज्रजिह्वा वैदेही वज्रविग्रहा ९३० ।
मंगल्या मंगला माला मलिना मलहारिणी ॥१४२॥
गान्धर्वी गारुडी चान्द्रीकम्बलाश्वतरप्रिया ।
सौदामिनी ९४० जनानन्दा भ्रुकुटीकुटिलानना ॥१४३॥
कर्णिकार करा नन्दा कंसप्राणापहारिणी ।
युगन्धरा युगावर्त्ता त्रिसन्ध्याहर्षवर्धिनी ॥१४४॥
प्रत्यक्ष देवता ९५० दिव्यदिव्या गन्धा दिवापरा ।
शक्त्यासनगता शाक्तिः साध्वी नारी शवासना ॥१४५॥
इष्टा विशिष्टा ९६० शिष्टेष्टा शिष्टा शिष्ट प्रपूजिता ।
शतरूपा शतावर्त्ता विनीता सुरभिः सुरा १४६॥
सुरेन्द्रमातासुद्युम्ना ९७० सुषुम्ना सूर्यसंस्थिता ।
समीक्षा सत्प्रतिष्ठा च निर्वृत्तिज्ञानपारगा ॥१४७॥
धर्मशास्त्रार्थ कुशला धर्मज्ञा धर्मवाहना ।

Agamnigam Digital Preservation Foundation, Chandigarh

Agamnigam Digital Preservation Foundation, Chandigarh

धर्माधर्म विनिर्मात्री ९८० धार्मिकाणाँ शिवप्रदा ॥१४८॥
धर्मशक्ति धर्ममयी विधर्मा विश्वधर्मिणी ।

धर्मान्तरा धर्ममध्या धर्मपूर्वा धनप्रिया ॥१४९॥
धर्मोपदेशा ९९० धर्मात्मा धर्मलभ्या धराधरा ।

कपाली साकलामूर्तिः कलाकलित विग्रहा ॥१५०॥
सर्वशक्तिविनिर्मुक्ता सर्वशक्त्याश्रया सदा ।

सर्वा सर्वेश्वरी १००० सूक्ष्मासुसूक्ष्मज्ञानरूपिणी ॥१५१॥
प्रधानपुरुषेशाना महापुरुषसाक्षिणी ।

सदाशिवा वियन्मूर्तिदेवमूर्तिरमूर्तिका १००८ ॥१५२॥
एवं नाम्नांसहस्त्रेण तुष्टाव रघुनन्दनः ।

कृताञ्जलिपुटो भूत्वा सीतां हृष्टतनूरुहाम् ॥१५३॥
भारद्वाज महाभागो यश्चैतस्तोत्रमद्भुतम् ।
पठेद्वापाठयेद्वापि जपन्हृष्टो स याति परमं पदम् ॥१५४॥
ब्रह्म क्षत्रिय विडयोनिर्ब्रह्म प्राप्नोति शाश्वतम् ।
शूद्र सद्गतिमान्प्रोति धनधान्यविभूतयः ॥१५५॥
भवन्ति स्त्रोत्रमाहात्म्यादेतत्स्वस्त्ययनं महत् ।
मारीभये राजभये तथा चोराग्निजे भये ॥१५६॥
व्याधीनां प्रभवे घोरे शत्रूत्थाने च संकटे ।
अनावृष्टिभये विप्र सर्वशान्तिकरं परम् ॥१५७॥
यद्यदिष्टतमंयस्य तत्वसर्वं स्तोत्रतोभवेत् ।
यत्रै तत्पठ्यते सम्यक् सीतानाम सहस्त्रकम् ॥१५८॥

Agamnigam Digital Preservation Foundation, Chandigarh

